1924.

THE

AMBÂ SANSKRIT SERIES;

A.

RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 322.

याज्ञवल्क्यस्मृतिः ।

मिश्रकृत'वीरमित्रोदय'टीकया श्रीविज्ञानेश्वरकृत-
'मिताक्षरा'टीकया च सहिता ।
ाहि[illegible]ाचार्य-खिस्ते नारायणशास्त्रिणा
योप[illegible]्या[illegible]-होशिङ्ग जगन्नाथशास्त्रिणा च
संशोधिता ।

YAJÑAVALKYA SMRTI

[W]ith the Commentary of Mitra Mis'ra's
[V]itrodaya and Vijnānes'vara's Mitākṣarā.

EDITED BY

[Nā]rāyaṇa S'āstrī khiste Sāhityāchārya Assistant Librarian
[Jaga]nnātha S'āstrī Hos'iṅga Sāhityopādhyāya Sādholāl Scholar
Sarasvatibhavana Benares.

FASCICULUS I–१.

[PUBL]ISHED & SOLD BY THE SECRETARY,
[CH]OWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
[PAN]DITA JYESHTHARAM MUKUNDAJI, BOMBAY:
[Pri]nted by Jai Krishna Das Gupta,
[at] the Vidya Vilas Press, Benares.

1924.

॥ श्रीः ॥

॥ याज्ञवल्क्यस्मृतिः ।

श्रीमन्मित्रमिश्रकृत वीरमित्रोदयाख्यव्याख्यया
श्रीमद्विज्ञानेश्वरकृतया मिताक्षराख्यव्याख्यया च
संवलिता ।

(वी०मि०) निःस्वाम्यं स्वस्य शंसन्निव विदधदिव द्वैतवार्तामिहार्ता-
मद्वन्द्वं शीलयिष्यन्निव च निजपदं शीलिताऽद्वन्द्वभावः ॥
अव्यात्त्वां शुद्धसत्त्वाङ्कुर इव विशदो विश्वभृत्क्रोडभर्तु-
र्दंष्ट्रेवोच्चैरनाशी हरमुकुटशशीवैकदन्तस्य दन्तः ॥ १ ॥
अस्ति क्षोणीप्रशस्तिस्तनुरिव गिरिशस्योडछी(१)पूरपूर्वा
दुर्वाराभात्तदुर्गातनुरतनुरिपुर्विभ्रती भूरिभूतिम् ॥
नीराजद्राजलक्ष्मीः सगुणमपि रुचा निर्धुनाना पिनाकं
दृप्यन्नागाजिनश्रीः सुवृषमधिगता नागरावद्धशोभा ॥ २ ॥
अरिकुलकरिकुम्भकूटपाटी शिखरितटीमिव यां प्रभापटीयान् ॥
अधिवसति महीन्दुवीरसिंहो मधुकरसाहिमहीशसिन्धुजन्मा ॥ ३ ॥
श्रेयःसम्भृतवीरसिंहनृपतेरपि प्रतापोदया-
द्दावोद्दामहुताशनाहितचमूरार्द्रेन्धनस्य श्रियम् ॥
या(२) चाऽन्तः स्फुटति ध्वनिं प्रकटयत्यप्यश्रुधारारसा—
विर्भावं तनुते तनोति कुयशोधूमैर्जगच्छ्यामलम् ॥ ४ ॥
गाम्भीर्यं बहु वीरसिंहनृपतेरम्भोधिरन्तः स्मरन्
दुर्वारौर्वशिखिच्छलेन निविडप्रौढोपतापं दधौ ॥
स्मारंस्मारमुदारसारनविकोदञ्चच्चमत्कारतो
जातो ऽचेतन एव जातजडिमा श्यामाकृतिः क्ष्माधरः ॥ ५ ॥
वाल्याऽवाल्यान्तरालस्थगितमिव मनः कामकौमारकेली-
मस्वीकुर्वन् किशोरीचरण इव रिपुश्रृङ्खलीभूय भूयः ॥

(१) छा-इति खपुस्तके पाठः । (२) येनाऽन्तः इति खपुस्तके पाठः ।

क्रीडान्तावस्थकान्ताजन इव विगलत्कुन्तलो व्यस्तवासा
यस्य त्रासाज्जरत्याः स्तन इव निपतन्नुन्नतिं नैव लेभे ॥ ६ ॥
भगोलाद् भूगोलाद्बहिरभियियासन्ति भवितुं
पठानाः पाठीना इव जलविलीनां धियमधुः ॥
मघो मोघारम्भोऽपसरति बुंदेलाकुलपतौ
रणार्थे दुर्वारे रणति रणसारे रणभुवि ॥ ७ ॥
बिभ्राणो बुधमित्रतां कविगुरू राजा धरानन्दनः
शोभाभिर्विलसत्तमो दिवि लसत्केतुश्च भास्वत्सुतः ॥
इत्थं जन्यजनुर्नवग्रहतनुः किन्त्वस्ति तुङ्गः सदा
स्वोद्रेकः किल वीरसिंहधरणीधौरेयचूडामणिः ॥ ८ ॥
शुभ्राभाविभवार्थमात्तवृषभो भोगीन्द्रभागीरथी-
भास्वद्भूतिभनाथभूषितवपुः कैलासवासी भवन् ॥
वीरश्रीयुतवीरसिंहनृपतेः सम्भाव्य शम्भुर्यशः
शान्त्यै साम्यविधेर्बभार गरलं कण्ठे किमुत्कण्ठितः ? ॥ ९ ॥
हेमोर्वीधरकर्णिकापरमहाशैलौघसंवर्तिका
व्यालेन्द्रैकमृणालिका गजघटाव्यालीनभृङ्गालिका ॥
सप्ताम्भोधिमधूलिकाविमलिका क्षोणीयशोमालिका
सम्पर्के ऽप्रतिमल्लवीरनृपतेः शुभ्रारविन्दायते ॥ १० ॥
व्रीडाभिर्जडिमोदयादुपलतां चिन्तामणिः पाशवं
कामं कामगवी च कल्पविटपी स्वर्गाटवीं गाहते ॥
आकर्ण्योर्जितवीरसिंहनृपतेर्दानोर्जिहानं यशः
सान्तर्द्धानतया ऽद्य निर्दयमधो नेतारमस्तौद्बलिः ॥ ११ ॥
वसु वर्षति वीरसिंहदेवे जलदः केवलमम्बु यद्विजेषु ॥
इयतैष यशोवदातविश्वो मलिनः सोऽजनि लज्जया तयैव ॥१२॥
दूराद् दुश्च्यवनो दिवस्पतिरभूद्दिकोणभाक् पावकः
कीनाशः स्वयमेव दण्डमितवान् रक्षोपि रक्षोक्तिभाक् ॥
पाशं च स्वयमाददे पतिरपां वातो गतो ऽदृश्यतां
प्रस्थाने धनदोऽस्य गुह्यकपदं दुर्गातिमुग्रो ऽचरत् ॥ १३ ॥
आरोहो गीर्लतायाः सवुपकृतिपदं धर्मभूमीरुहाणा-
मुद्यानं शुद्धकीर्तेरुपचयभवनं श्रीमृगीवागुरेव ॥
आकारो विप्रताया निधिरपि महसः सर्वविद्याऽनवद्यो

यद्वारि द्योतते श्रीद्युमणिरिव तमो मूर्च्छयन्मित्रमिश्रः ॥ १४ ॥
क्ष्माचक्रं चारु चक्रे समुचितनयतो रक्षितं भूमिदेवान्
देवांश्च प्राप्तसेवान् विमलमपि यशो वीरसिंहो नरेन्द्रः ॥
वित्तं मत्वाऽप्यसारं वितरदविरतं याज्ञवल्क्योक्तिमुक्ता-
हारं स्मृत्यर्थसारं रचयितुमथ स प्रादिशन्मित्रमिश्रम् ॥१५॥
उत्तंसस्तीरभुक्तेरखिलबुधगुरुः श्रीसदानन्दधीमान्
श्रीभाजो मित्रमिश्राज्जगदुपकृतये विभ्रदादेशदीपम् ॥
ज्ञानानां दैन्यदोषापहमकलिभयं याज्ञवल्क्योक्तिकोशाद्
दृष्ट्वा स्मृत्यर्थसारं समचिनुत यशो धर्मलक्ष्मीविहारम् ॥ १६ ॥

इह हि भगवता महर्षिणा याज्ञवल्क्येन लोकहिताय प्रणीतं धर्मशास्त्रं तच्छिष्यप्रवरो मानवं भृगुरिव प्रश्नोत्तरप्रबन्धेन संक्षिप्य वक्तुं प्रस्तौति—

योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् ॥
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥ १ ॥

इत्येवं सम्प्रदायविदोऽवतारयन्ति। परे पुनर्योगीश्वरमित्याद्यपि याज्ञवल्क्यप्रणीतमेव। 'कर्माण्यपि जैमिनिः फलार्थत्वात्' इति [जै० सू० ३।१।४।] 'तदुपर्यपि बादरायणः सम्भवात्' [ब्र०सू० १ । ३ । २६] इत्यादावाचार्याणामित्थमेव स्वग्रन्थे स्वनामकीर्तनस्य दर्शनात्। योगीश्वरमित्यादि स्वोत्कर्षकीर्तनं तु शिष्याणां श्रद्धादार्ढ्याय न त्वभिमानविशेषविजृम्भितमिति वर्णयन्ति।

इदं च शास्त्रमध्यायत्रयात्मकम्। तत्र प्रथमेऽध्याये-(१) उपोद्घातप्रकरणम् [श्लो० १-९] (२) ब्रह्मचारिप्रकरणम् [श्लो० १०-५०] (३) विवाहप्रकरणम् [श्लो० ५१-८९] (४) जातिवर्णविवेकप्रकरणम् [श्लो० ९०-९६] (५) गृहस्थप्रकरणम् [श्लो० ९७-१२८] (६) स्नातकप्रकरणम [श्लो० १२९-१६६] (७) भक्ष्याऽभक्ष्यप्रकरणम् [श्लो० १६७-१८१] (८) द्रव्यशुद्धिप्रकरणम् [श्लो० १८२—१९७] (९) दानप्रकरणम् [श्लो० १९८-२१६] (१०) श्राद्धप्रकरणम् [श्लो० २१७-२७०] (११) शान्तिप्रकरणम् [श्लो० २७१-३०८] (१२) राजधर्मप्रकरणम् [श्लो० ३०९-३६८] एवं द्वादश

प्रकरणानि । द्वितीयतृतीयाध्याययोस्तु प्रकरणानि तत्र तत्राऽभिधास्यन्ते । तदेतद्यथामति प्राचीननिबन्धानुपजीव्य व्याख्यायते ।

योगीश्वरामित्यादि । योगो वृत्तिनिरोधः तद्वतामीश्वरं श्रेष्ठम् । एतेन सार्वज्ञ्यं सूचितम् । यद्वा, प्रशंसायामिनिः । प्रशस्तयोगवन्तमीश्वरमणिमादिविभूतियुक्तञ्च ॥ अणिमादिकमभिधाय 'ऐश्वर्यं कारणैरेभिर्योगिनः प्रोक्तमष्टधा' इति मार्कण्डेयपुराणात् । अत्र योगीश्वरपदप्रयोगान्मङ्गलमपि निबद्धं वेदितव्यम् । याज्ञवल्क्यमिति=नामाऽनुकीर्तनम् । सम्पूज्य=कायवाङ्मनोभिः सम्यक् समाराध्य । मुनयः=सोमश्रवःप्रमुखाः । अब्रुवन् । किम् ? वर्णेत्यादि । वर्णाः=ब्राह्मणादयः । आश्रमाः=ब्रह्मचर्यादयः 'ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये । आश्रमोऽस्त्री द्विजात्यग्रजन्मभूदेववाडवाः' इत्यनुशासनात् । इतरे=सङ्कीर्णाः । 'द्वन्द्वे च' इति सर्वनामसंज्ञानिषेधादितराणामिति रूपम् । वर्णादीनां पुंस्त्वं चाऽत्र न विवक्षितं बीजाऽभावात् स्त्रीणामपि सङ्ग्रहः, सामान्यपरत्वान्नपुंस(१)कतेतरशब्देन तासामप्युक्तिरित्यप्याहुः । तेषां धर्मान्=स्मार्तान् अस्मत्सन्देहास्पदत्वोचितान् । अशेषतः=कात्स्न्र्येन । नः=अस्मान् । ब्रूहि ।

इत्थं व्याख्याने च केषाञ्चिद्धर्माणामग्रेऽनभिधानेऽपि न न्यूनतेत्यवधेयम् । न च दण्डनीतिदारोपगमादीनां लौकिकत्वेन धर्मभिन्नानामप्यभिधानादाधिक्यमाशङ्कनीयम्, तेषामपि नियमविषयतया धर्मत्वाद्विध्यादिविषयतयेव यागादीनां स्वरूपतस्तेषामलौकिकत्वात् । विध्युपलन्दानेन तु तेषामलौकिकत्वं दण्डनीत्यादीनां च नियमोपसन्दानेनेति न कश्चिद्विशेषः । इदमेव चाऽभिसन्धाय भगवान् जैमिनिर्धर्मलक्षणं विवक्षन्नसूत्रयत् "चोदनालक्षणोऽर्थो धर्मः"[जै०सू० १।१।२।] इति। एतत्सूत्रव्याख्यानं च प्रकृतोपयोग्यपि विस्तरभयान्नेह ततमन्यत्र द्रष्टव्यम् । धर्मानित्याद्यर्थबहुवचनेन चतुर्वर्गस्य ग्रहणमिति स्मृतयः । अतो धर्मोऽभिधेयः कण्ठत एव दर्शितः । स च षड्विधः–वर्णधर्म, आश्रमधर्मो, वर्णाश्रमधर्मो, गुणधर्मो, निमित्तधर्मः, साधारणधर्मश्च । तत्राऽऽद्यो मद्यपानवर्जनादिः, द्वितीयो भैक्ष्यचर्यादिः, तृतीयः पालाशदण्डधारणादिः, चतुर्थः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः, पञ्चमः प्रायश्चित्तम्, षष्ठः=अहिंसादिः । द्विविधश्च प्रवृत्तनि-

(१) सकलिङ्गेनेतरशब्देन इति खपुस्तके पाठः ।

वृत्तभेदात् । तथा च मनुः—

> प्रवृत्तश्च निवृत्तश्च द्विविधं कर्म वैदिकम् ।
> इह चाऽमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
> निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ।

त्रिविधश्च नित्यनैमित्तिककाम्यभेदादिति विवेक्तव्यम् । प्रयोजनं तु स्वर्गाद्यलौकिकश्रेयःसाधनवाचिना धर्मपदेनैव सूचितम् । धर्मज्ञानादिप्रणाडिकयैतच्छास्त्रस्य धर्मप्रयोजकतायाः कटाक्षितत्वादिति ॥ १ ॥

> (मिता०) धर्माधर्मौ (१)तद्विपाकास्त्रयोऽपि
> (२)क्लेशाः पञ्च प्राणिनामायतन्ते ॥
> यस्मिन्नेतैर्नो परामृष्ट ईशो
> यस्तं वन्दे विष्णुमाकारवाच्यम् ॥ १ ॥
> याज्ञवल्क्यमुनिभाषितं मुहु-
> र्विश्वरूपविकटोक्तिविस्तृतम् ॥
> धर्मशास्त्रमृजुभिर्मिताक्षरै-
> र्बालबोधविधये विविच्यते ॥ २ ॥

याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपं याज्ञवल्क्यमुनिप्रणीतं धर्मशास्त्रं संक्षिप्य कथयामास । यथा (३)मनुप्रणीतं भृगुः । तस्य चायमाद्यः श्लोकः—

योगीश्वरमिति । योगिनां सनकादीनामीश्वरः (४)श्रेष्ठस्तं याज्ञवल्क्यं सम्पूज्य मनोवाक्कायकर्मभिः पूजयित्वा मुनयः(५)सोमश्रवःप्रभृतयः श्रवणधारणयोग्या अब्रुवन् उक्तवन्तः धर्मान्नोऽस्मभ्यं (६)ब्रूहीति । कथम् ?

---

(१) जात्यायुर्भोगा विपाकाः ।

(२) अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पञ्च क्लेशाः ॥ (पात० सू० २ । ३ ।) तत्राऽविद्या नाम अनित्ये, अशुचौ, दुःखे, अनात्मनि च नित्यशुचिसुखात्मना प्रत्ययः । वस्तुतोऽत्यन्तविभक्तयोरपि दृक्शक्तिदर्शनशक्त्यात्मनोः पुरुषबुद्ध्योरनाद्यविद्यामहिम्ना बुद्ध्येकात्मतावभासः पुरुषस्याऽस्मिता ।

अनुभूतसुखस्य तत्र तत्साधने वा लोभो रागः ।
अनुभूतदुःखस्य तत्र तत्साधनेवा परिजिहीर्षा द्वेषः ॥

पामरस्येव श्रुतानुमितविवेकिनोऽपि विदुषो यो नैसर्गिको रूढो मरणादेस्त्रासः सोऽभिनिवेशः ।

(३) मनुनेक्तं ख० (४) प्रभुस्तं ख० (५) सोमश्रवादयः क० (६) ब्रूहि कथयेति क०

अशेषतः कार्त्स्न्येन केषाम् · वर्णाश्रमेतराणाम् वर्णा ब्राह्मणादयः, आश्रमा ब्रह्मचारिप्रभृतयः, इतरे ऽनुलोमप्रतिलोमजाता मूर्धावसिक्तादयः । इतरशब्दस्य 'द्वन्द्वे च' इति सर्वनामसंज्ञाप्रतिषेधः । अत्र च धर्मशब्दः (१)षड्विधस्मार्तधर्मविषयः । तद्यथा-वर्णधर्म, आश्रमधर्मो, वर्णाश्रमधर्मो, गुणधर्मो, निमित्तधर्मः, साधारणधर्मश्चेति । तत्र वर्णधर्मो 'ब्राह्मणो नित्यं मद्यं वर्जयेत्'इ(२)त्यादिः । आश्रमधर्मोऽग्नीन्धनभैक्ष्यचर्यादिः। वर्णाश्रमधर्मः 'पालाशो दण्डो ब्राह्मणस्य'इत्येवमादिः । गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादिः । निमित्तधर्मो विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तम् । साधारणधर्मोऽहिंसादिः । 'न हिंस्यात्स(३)र्वाभूतानि'इत्याचण्डालं साधारणो धर्मः । 'शौचाचा(४)रांश्च शिक्षयेत्'इत्याचार्यकरणविधिप्रयुक्तत्वाद्धर्मशास्त्राध्ययनस्य प्रयोजनादिकथनं नातीवोपयुज्यते । तत्र चायं क्रमः । प्रागुपनयनात्कामचारकामवादकामभक्षाः । ऊर्ध्वमुपनयनात्प्राग्वेदाध्ययनोपक्रमाद्धर्मशास्त्राध्ययनं, ततो धर्मशास्त्रविहितयमनियमोपेतस्य वेदाध्ययनं, ततस्तदर्थजिज्ञासा, ततस्तदर्थानुष्ठानमिति । तत्र यद्यपि धर्मार्थकाममोक्षाः शास्त्रेणानेन प्रतिपाद्यन्ते तथापि धर्मस्य प्राधान्याद्धर्मग्रहणम् । प्राधान्यं च धर्ममूलत्वादितरेषाम् । न च वक्तव्यं धर्ममूलोऽर्थो ऽर्थमूलो धर्म इत्यविशेष इति । यतोऽर्थमन्तरेणापि(५)जपतपस्तीर्थयात्रादिना धर्मनिष्पत्ति, रर्थलेशोऽपि न धर्ममन्तरेणेति । एवं काममोक्षावपीति॥१॥

मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन् ॥
यस्मिन्देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत ॥ २ ॥

(वी० मि०) मिथिला विदेहनगरी तस्यां स्थितः । एतेन देशप्रकर्षनिबन्धनोऽध्यापनोपयोग्युत्कर्षः सूचितः । स तथा पृष्टः योगीन्द्रः= योगिनां परमेश्वरोऽपि । क्षणं=कञ्चित्कालमभिव्याप्य । ध्यात्वा प्रकृत-

(१) स्मार्तकविषयः० (२) वर्जयेदिति क.

(३) अयमेव पाठो युक्तः । सर्वभूतानि इति ख. पाठः.

(४) श्रुत्युक्तशौचाचारान ख. (५) जपतीर्थयात्रा क० ख०

वचनौपयिकमर्थजातं कश्चित्स्वरसतः, कश्चिच्च मनःप्रणिधानेन चिन्तयित्वा। 'क्षणमात्रमृषिस्तस्थौ सुप्तमीनो यथा ह्रदः। सोऽपश्यत्प्रणिधानेन' [रघु०१।७३,७४] इत्यादौ योगिनामपि सूक्ष्मेक्षणाय प्रणिधानप्रतिपादनात्। अब्रवीत्—यस्मिन्देश इत्यादि। मुनीन्=मननशीलान् तर्कोपजीविन इति यावत्। प्राचीनाचार्यशैलीमनुसरता महर्षियाज्ञवल्क्येनाऽत्राऽनुक्तैरपि स्मृत्यन्तरोक्तैः कैश्चिद्धर्मैरेतच्छास्त्रोपबृंहणे शिष्याणां सामर्थ्यसूचनादनुक्त(१)निबन्धनान्यूनता परिहृतेत्यवधेयम्। धर्मान्=बुभुत्सितान्। निबोधत=निस्सृष्टबोधविषयीकुरुत। बोधस्य यथात्वं देशकालहेतुस्वरूपलक्षणप्रमाणफलादितत्तद्धर्मसम्बन्धिक्रोडीकरणेनेति प्रथमतः प्राधान्यादेशेन धर्मान् विशिनष्टि। यस्मिन्=क्वचिदपि देशे=भूभागे भारतवर्षरूपे; तदुपक्रम्य 'कर्मभूमिरियं स्वर्गमपवर्गश्च गच्छताम्' इति विष्णुपुराणात्। मृगः कृष्णः=कृष्ण इत्यर्थः। चरति=स्वभावत इति शेषः। 'कृष्णसारस्तु चरति मृगो यत्र स्वभावतः' इति मनुवचनात्। तस्मिन् अनुष्ठेयान्। अत्र यस्मिन्नित्यादिसिद्धवल्लिखनाद्ब्रह्मावर्तादेः पुण्यत्वाभिधानमन्यत्र प्रशंसार्थम्।

आसमुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात्।
तयोरेवाऽन्तरं गिर्योरार्यावर्तं प्रचक्षते ॥

इति मनुना कृष्णसाररहितस्याऽपि देशस्याऽऽर्यावर्तत्वकथनेन धर्मत्वप्रतिपादनं तु असम्पूर्णधर्माभिप्रायेण; विशिष्टदेशे धर्माणामेव विशेषणादधर्मोत्पत्तावार्यावर्तादिविशेषो नाऽपेक्षितः, किन्तु भारतवर्षमात्रमिति मन्तव्यम् ॥ २ ॥

(मिता०) एवं पृष्टः किमुवाचेत्याह—

मिथिलास्थ इति। मिथिला नाम नगरी तत्रावस्थितः स याज्ञवल्क्यो योगीश्वरः क्षणं ध्यात्वा कञ्चित्कालं मनः समाधाय एते श्रवणाधिकारिणो विनयेन पृच्छन्तीति युक्तमेतेभ्यो वक्तुमित्युक्तवान्मुनीन्। किम्। यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधतेति। कृष्णसारो मृगो यस्मिन्देशे स्वच्छन्दं विहरति तस्मिन्देशे वक्ष्यमाणलक्षणा धर्मा अनुष्ठेया नान्यत्रेत्यभिप्रायः ॥ २ ॥

---

(१) दनुक्तानिबन्धनान्यूनता—इति खपुस्तके पाठः।

(वी० मि०) अथ धर्मस्य प्रयोजनहेतून् प्राधान्यगुणत्वाभ्यामापाततः संमुग्धानेव प्रमितिप्रयोजकांश्च प्रदर्शयन् प्रकृतशास्त्रस्य पूर्वकटाक्षितधर्मप्रयोजकताप्रकटनेन प्राक् सूचितं प्रयोजनसम्बन्धं स्फुटयति—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ ३ ॥

पुराणानि—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥
इति लक्षितानि ।
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथाऽन्यन्नारदीयं च मार्कण्डेयञ्च सप्तमम् ॥
आग्नेयमष्टमं चैव भविष्यं नवमं तथा ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ॥
वाराहं द्वादशं चैव स्कान्दं चाऽत्र त्रयोदशम् ।
चतुर्दशं वामनकं कौर्मं पञ्चदशं स्मृतम् ॥
मात्स्यञ्च गारुडं चैव ब्रह्माण्डञ्च ततः परम् ।
इति विष्णुपुराणे दर्शितानि ।

कौर्मे तु (१)विष्णुपुराणमनन्तर्भाव्य वायुपुराणमुपादायाऽष्टदशत्वमुक्तं तदनयोर्विकल्प एव । भागवतं प्रसिद्धमेव ।

अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनैव यदीच्छसि भवक्षयम् ॥ इति वचनात् ।
यत्रोपक्रम्य गायत्रीमुच्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥

इति लक्षणस्य तत्रैव सम्भवाच्च । प्रसिद्धे गायत्र्योपक्रमस्य व्याख्यातृभिर्दर्शितत्वात्पुराणान्तरे तल्लेशस्याऽप्यभावादिति निपुणमालोचनीयम् ।

अत्र पुराणशब्देनोपपुराणादीन्यप्युपलक्ष्यन्ते । तत्र कूर्मपुराणम्—

(१) विष्णुपुराणमुपादायेति खपुस्तके पाठः ।

अन्यान्यपि पुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ॥
तृतीयं पाद्ममुद्दिष्टं कुमारेण सुभाषितम् ।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दिप्रवर्तितम् ॥
दुर्वाससोक्तमाश्चर्यं(१) नारदोक्तमतः परम् ।
कापिलं वामनं चैव तथैवोशनसोदितम् ॥
ब्रह्माण्डसंज्ञकं चैव कालिकासंज्ञमेव च ।
माहेश्वरं तथा साम्बं सौरधर्मानुसंश्रयम् ॥
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ।
इदञ्च पञ्चदशमं पुराणं कौर्ममुच्यते ॥
पद्मे पुराणे यत्प्रोक्तं नरसिंहोपवर्णनम् ।
तदष्टादशसाहस्रं नारसिंहमिहोच्यते ॥
नन्दाया यत्र माहात्म्यं कार्तिकेयेन वर्ण्यते ।
नन्दापुराणं तल्लोके नन्दाख्यमिति कीर्त्यते ॥
यत्तु साम्बं पुरस्कृत्य भविष्येऽपि कथानकम् ।
तत्प्रोच्यते पुनर्लोके साम्बमेव मुनिव्रताः ॥
एवमादित्यसंज्ञा च तत्रैव परिगण्यते ।
अष्टादशभ्यस्तु पृथक् पुराणं यत्तु दृश्यते ॥
विजानध्वं मुनिश्रेष्ठास्तदेतेभ्यो विनिर्गतम् ।

विनिर्गतमुद्धृतम् । प्रमाणकरणे भविष्यत्पुराणम्—

अष्टादश पुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥
कार्ष्णञ्च पञ्चमं वेदं(?) यन्महाभारतं स्मृतम् ।
सौराश्च धर्मा राजेन्द्र ! मानवोक्ता महीतले ॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ।

न्यायः='प्रमाणप्रमेय' इत्यादि 'हेत्वाभासाश्च यथोक्ताः' इत्यन्तं पञ्चाध्यायीशास्त्रमक्षपादप्रणीतम् । न्यायपदेन च साक्षाच्छ्रुतिविचारोदासीनानि वैशेषिकसाङ्ख्यपातञ्जलान्यपि गृह्यन्ते । मीमांसा=श्रुत्यादिविचारः कर्मविषयकः 'अथाऽतो धर्मजिज्ञासा' [जै०सू०१।१।१] इत्या-

(१) दुर्वाससोक्तमाचर्यं-इति ख० पुस्तके ।

द्विद्वादशाऽध्यायीरूपो जैमिनिप्रणीतः, ब्रह्मविषयकश्च 'अथाऽतो ब्रह्मजिज्ञासा'[ब्र० सू० १।१।१]इत्यादिचतुरध्यायीरूपो व्यासप्रणीत इति द्विविधः। धर्मशास्त्राणि=स्मृतयो मन्वादिप्रणीता धर्मसंहिताः।

दृष्टार्था तु स्मृतिः काचिददृष्टार्था तथा परा।
दृष्टाऽदृष्टार्थरूपाऽन्या न्यायमूला तथा परा॥
अर्थवादस्मृतिस्त्वन्या शिष्टैर्दृष्टा तु पञ्चमी।

इति भविष्यत्पुराणे विभक्ताः। गृह्याणि स्मृतिरूपाण्येव। स्मृतिपदेन पञ्चरात्राण्यपि गृह्यन्ते,तेषामपि मन्वादिस्मृतिवदेव प्रामाण्यात्।

अलाभे वेदमन्त्राणां पञ्चरात्रोदिते नये।
आचारेण प्रपद्यन्ते मामायास्यन्ति मानवाः॥

इति वाराहे श्रीभगवद्वाक्यात्।

अभावे वेदमन्त्राणां पञ्चरात्रोदिते विधिः।

इति तत्रैव वचनान्तरात्।

पञ्चरात्रविधानेन सम्पूज्य मधुसूदनम्।

इति ब्रह्मपुराणात्। महाभारते पञ्चरात्राणां प्रशंसितत्वाच्च।

एवञ्च वेदान्ते भट्ट(१)वाक्ये च पञ्चरात्राप्रामाण्याऽभिधानं वेदविरुद्धपञ्चरात्रविषयमिति मन्तव्यम्। तथा हि-स्मृतिपादे 'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्' [जै० सू० १।३।३] इति सूत्रे प्रत्यक्षश्रुतिविरुद्धस्मृतिप्रामाण्यमनपेक्ष्यमिति व्यवस्थाप्यते।'हेतुदर्शनाच्च' [जै० सू० १।३।४] इति सूत्रेऽपि भट्टपादाः—(२)'यान्येतानि त्रयीविद्भिर्न परिगृहीतानि किञ्चित्तन्मिश्र(३)धर्म(४)कञ्चुकच्छायापतितानि लोकोपसङ्ग्रहलाभपूजाख्यातिप्रयोजनपराणि त्रयीविपरीतासम्बद्धदृष्टशोभादिप्रत्यक्षानुमानोपमानार्थापत्तिप्राययुक्तिमूलोपनिबद्धानि सांख्ययोगपाञ्चरात्र(५)पाशुपतशाक्यनिर्ग्रन्थपरिगृहीत(६)ध-

(१) भट्टवार्तिके— इति ख० पुस्तके।
(२) अयं पाठः 'बनारस संस्कृत सीरीज्' मुद्रितपुस्तकस्थः पृ० ११४—११५।
(३) तुल्याश्रय-इति क. ख. पुस्तकयोः पाठः।
(४)धर्म— इति ख० पुस्तके नाऽस्ति।
(५) 'पाञ्चरात्र' इत्यस्य स्थाने 'मन्त्र'-इति क. ख. पुस्तकयोः पाठः।
(६) धर्मा-इति क. ख. पुस्तकयोर्नास्ति.।

र्मोऽधर्मनिबन्धनानि विषचिकित्सावशीकरणोच्चाटनोन्मादनादि(१)समर्थकतिपयमन्त्रौषधिकादाचित्कसिद्धि(२) बलेनाऽहिंसासत्यवचन(३)दमदानदयाश्रुतिस्मृति(४)संवादिस्तोकार्थगन्धवासितजीविकाप्रायार्थान्तरोपदेशीनि, यानि च बाह्यतराणि (५) म्लेच्छाचारमिश्रकभोजनाचरणनिबन्धनानि, तेषामेवैतच्छ्रुतिविरोधहेतुदर्शनाभ्यामनपेक्षणीयत्वं(६) प्रतिपाद्यते' इति प्राहुः । अत एव रत्नमालायां भोजराजेन 'प्रोक्तानी'त्यादिभगवद्वचनमु(७)दाहृत्य कूर्मपुराणवचनं प्रत्युदाहृतम् ।

अन्यानि चैव शास्त्राणि लोकेऽस्मिन् मोहनानि तु ।
वामं पाशुपतं सोमं लक्षणं(?) चैव रौ(८)रवम् ॥
असत्यमेतत्कथितं वेदबाह्यं तथैव तत् ।

तथा—

वामपाशुपताचारास्तथा वै पाञ्चरात्रिकाः ।
भविष्यन्ति कलौ तस्मिन् ब्राह्मणाः क्षत्रियास्तथा ॥

पाञ्चरात्रिका वेदविरुद्धपञ्चरात्रव्यवहारिणः ।

अत एव चाऽग्निपुराणे पञ्चरात्रपरिगणने पाशुपतादिपञ्चरात्राणि पठितानि । यथा हयग्रीव उवाच—

प्रोक्तानि पञ्चरात्राणि सप्तरात्राणि वै मया ।
व्यक्तानि मुनिभिर्लोके पञ्चविंशतिसंख्यया ॥
हयशीर्षं तन्त्रमाद्यं तन्त्रं त्रैलोक्यमोहनम् ।
वैभवं पौष्करं तन्त्रं प्राह्लादं गार्ग्यमा(९)लवम् ॥
नारदीयं च माण्डव्यं शाण्डिल्यं वैश्वकं तथा ।
सत्योक्तं शौनकं तन्त्रं वासिष्ठं ज्ञानसागरम् ॥
स्वायंभुवं कापिलं च तार्क्ष्यं नारायणीयकम् ।

---

(१) उत्सादनादि-इति क. ख. पुस्तकयोः पाठः ।
(२) कादाचित्कसिद्धि-इति क. ख. पुस्तकयोर्नास्ति ।
(३) शम—इत्यधिकः क० पुस्तके पाठः ।
(४) स्मृति-इति क. ख. पुस्तकयोर्नास्ति ।
(५) बाह्यचराणि-इति क. पुस्तके पाठः ।
(६) अनपेक्ष्यत्वं-इति क. ख. पुस्तकयोः पाठः ।
(७) उपाकृत्य-इति क० पुस्तके, उपाहृत्य- इति ख० पुस्तके ।
(८) चौरवम्-इति ख० पुस्तके ।
(९) लाघवम्-इति " " ।

आग्नेयं नारसिंहाख्यं(१) मानदाख्यं तथारुणम्॥
बौधायनं तथावार्ण(?)मित्युक्तस्तस्य(२)विस्तरः।

एतत्सर्वमभिसन्धायाऽऽह्निके पञ्चरात्रनिर्मूलत्वाभिधानं निर्मूलमिति श्रीदत्तोपाध्यायानां सिंहनादः। पञ्चरात्रपाशुपतादीन्यपि शास्त्राणि वेदाविरुद्धभागे प्रमाणमेवेति पारिजातश्चेति सकलशिष्टानुमतार्थव्यवस्थापने कृतं बहुभिरावेशैरिति। एवमन्यान्यपि-'स्मृतिरिति शिष्टाः' इत्याद्युक्तप्रामाणिकनिबन्धेषु लिखितानि वाक्यानि ग्राह्याणि, महाजनपरिग्रहात्। षट्त्रिंशन्मतादीन्यपि तथेति केचित्। नेति कल्पतरुः।

अङ्गानि='शिक्षाव्याकरणनिरुक्तच्छन्दः कल्पज्योतिषाणि वेदाङ्गानि' इति देवलोक्तानि। शिक्षा=वेदाध्ययनेतिकर्तव्यताप्रतिपादको याज्ञवल्क्यपाणिनिपराशरादिग्रन्थः। व्याकरणं—'वृद्धिरादैच्' इत्यादि 'अ अ' इत्यन्तमष्टाऽध्यायीशास्त्रं पाणिनिप्रणीतमन्येषां वैदिकाऽव्युत्पादकत्वात्। निरुक्तं=यास्कप्रणीतो वैदिकपदार्थादिव्युत्पादको ग्रन्थः। छन्दः=गायत्र्यादिच्छन्दःप्रतिपादकं पिङ्गलप्रणीतं शास्त्रम्। कल्पः=ज्योतिष्टोमाद्यनुष्ठानपद्धतयः कात्यायनबौधायनादिप्रणीताः। ज्योतिः=ग्रहगत्यादिबोधकं होराशास्त्रमिति प्रसिद्धं गर्गादिप्रणीतम्।

एतैः पुराणादिभिर्मिश्रिता युक्ता वेदाः वैदिकयाज्ञिकानां मन्वादीनामभियुक्तानां वेद इति प्रसिद्धविषयाः शब्दाः, मन्त्राधिकरणन्यायात्। अपौरुषेयवाक्यत्वं वेदत्वमित्येके। मीमांसासिद्धपौरुषेयान्यजातीयव्याख्यानवाक्यत्वं तदिति कण्टकोद्धारः।

केचित्तु न्यायनिबन्धप्रकाशे 'कथात्वं जाति'रिति (३)वर्द्धमानचरणानां सोपपत्ति लिखनं पश्यन्तस्तादृशा 'वेदत्वं जाति'रिति परिष्कुर्वते। अखण्डोपाधिर्वेदत्वमिति तूच्छृङ्खलाः।

ते पुनश्चतुर्विधा 'ऋग्यजुःसामाथर्वाणो वेदाः' इति देवलादिभिर्विभज्य प्रतिपादिताः। तत्र ऋग्बहुलो वेदभाग ऋक्, यजुर्बहुलः स यजुः, सामबहुलस्तु साम। अदृष्टद्वारा दृष्टप्रयोजनक(४)कर्मप्रतिपादकवाक्यबहुलश्चाऽथर्वा। खिलशुक्रियौ त्वेतच्चतुष्टयान्तर्भूतावेव।

(१) नारसिंहं च-इति ख० पुस्तके।
(२) तथावर्णतमित्युक्तस्य-इति क. पुस्तके, तथार्णमित्युक्तस्य-इति ख. पुस्तके.।
(३) वर्द्धमानेत्यादि-वेदत्वमिति तूच्छृङ्खला इत्यन्तो भागः ख० पुस्तके नास्ति।
(४) कर्मप्रयोजको वेदभागः खिलः इति ख० पुस्तके।

तत्राऽनिरुक्त इदानीमनुष्ठानप्रयोजको वेदभागः खिलः। शुक्रोक्तत्वेन ब्राह्मणे कीर्तितो वेदभागः शुक्रियः। आङ्गिरसस्त्वथर्वैकदेश एवेति।

अथैतेऽपि चत्वारो वेदाः प्रत्येकं द्विविधाः, मन्त्रब्राह्मणभेदात्। तत्र यानि प्रयोगकाले ऽनुष्ठानौपयिकार्थाभिधानरूपाणि वेदवाक्यानि तानि मन्त्रशब्देनोच्यन्त इति 'तच्चोदकेषु मन्त्राख्या' [जै० सू० २। १।३२] इति मन्त्राधिकरणे व्यवस्थितम्। तत्रापि मन्वादीनां मन्त्रप्रसिद्धिरेव मन्त्रलक्षणं विवक्षिताविवक्षितविवेकेन पर्यवस्यति। अत एव प्रायिकमिदमभियुक्तप्रसिद्धलक्षणार्थं यत्राभियुक्तानां मन्त्रप्रसिद्धिः स मन्त्र इत्यर्थ इति पार्थसारथिमिश्राः। भगवान् जैमिनिरपि ऊहप्रवरनामधेयानां मन्त्रत्वनिरासाय 'अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात्'[जै०सू०२।१।३४]इति मन्त्रप्रसिद्धिमेवोपलक्षयति।आहुश्च भट्टपादाः-

याज्ञिकानां समाख्यानं विज्ञेयं मन्त्रलक्षणमिति।

अत्र मन्त्रेत्युपलक्षणमिति ब्राह्मणस्य ऋग्यजुःसामादीनां सूक्तानुवाकादीनां चेत्थमेव लक्षणं निरवद्यम्। सम्भवप्राचुर्यात्तु लक्षणान्तराण्यभिधीयन्त इति मन्त्रभागातिरिक्तो वेदभागो ब्राह्मणम्, यदाह—'शेषे ब्राह्मणशब्दः' [जै० सू० २। १। ३३]। मन्त्रवाक्यावशिष्टं वेदवाक्यं ब्राह्मणमित्यर्थः। मन्त्रा अपि ऋचो यजूंषि सामानि निगदा मन्त्रा इति कात्यायनेन विभक्ताः। यत्राऽर्थवशेन पादव्यवस्था स मन्त्र ऋक्। यदाह-'तेषामृग्यत्रार्थवशेन पादव्यवस्था'[जै० सू० २।१।३५]। नियताक्षर(१)मन्त्र ऋगिति पर्यवसितार्थः। अनीयमानत्वं चाऽत्र विशेषणमर्थादन्यथा साम्न्यतिप्रसङ्गात्। अनियताक्षरावसानो मन्त्रः पुरस्कृतगानो यजुः। इदन्तु नान्तरीयकतया कटाक्षयन्नेव यजुर्लक्षणमाह-'शेषे यजुःशब्दः'[जै० सू० २। १। ३७]। ऋक्सामभ्यां यदन्यत्प्रश्लिष्टपठितं तद्यजुः। गीयमानो मन्त्रः साम। यद्यपि गीतमेव सामशब्दार्थत्वेनाऽसिद्धान्तयत् सप्तमेऽध्याये। तथाहि—'रथन्तरेण स्तुवीत' इत्यादिदर्शनादक्षरेषु तद्व्यपदेशः। एवं च मन्त्रविभागप्रकरणे सामशब्दस्य गीयमानाक्षरपरतामेवाऽभिप्रयन्नसूत्रयत्। 'गीतिषु सामाख्या [जै० सू० २। १। ३६]। अक्षरपरतया कथंचित्सूत्रयोजनादिति। निगदास्तु 'प्रोक्षणीरासाद-

(१) एतदग्रे—पादावसानो—इति ख. पुस्तके।

यति' इत्येवमादयः परसम्बोधनरूपा मन्त्राः । निगदाधिकरणे 'निगदो वा चतुर्थं स्याद्धर्मविशेषात्'[जै० सू० २ । १ । ३८]इत्याक्षिप्य यजुर्विशेषा एवेत्यसिद्धान्तयत् । अत एव—'अहेर्बुध्निय मन्त्रं मे गोपाय, यमृषयस्त्रयीविदो विदुः । ऋचः सामानि यजूँषि' इति श्रुतौ त्रिधैव मन्त्रः कथितो यद्यपि, तथापि 'उपांशु यजुषा, उच्चैर्निगदेन' इत्यादौ विशेषसंज्ञापुरस्काराद्यजुर्विशेषप्रदर्शनाय निगदाः कात्यायनेन पृथगुपात्ता इति मन्तव्यम् । ब्राह्मणन्तु द्विविधं, विध्यर्थवादभेदात् । परकृतिपुराकल्पौ त्वर्थवादान्तर्भूतावेव । तत्र विधिश्चतुर्द्धा—उत्पत्तिविनियोगप्रयोगाऽधिकारभेदात् । विध्यन्तराविषयपदार्थस्वरूपप्रतिपादकोऽपि विधिरुत्पत्तिविधिराद्यप्राप्तेरुत्पत्तित्वात् । तत्र चाऽस्य शब्दान्तराभ्यासगुणसङ्ख्यानामधेयप्रकरणाख्यानि षट् सहकारीणि । अथ 'अग्निष्टोमेन यजेत' इत्यादिपरा(१)र्थ्यरूपशेषत्वबोधको विधिर्विनियोगविधिः। नियोगे चास्य 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या'रूपाणि षट् सहकारीणि । फलस्वामित्वरूपाधिकारबोधको विधिरधिकारविधिः । यथा 'ज्योतिष्टोमेन यजेत स्वर्गकामः' इत्यादिः । साङ्गप्रधानस्य युगपत्कर्तव्यताबोधको विधिः प्रयोगविधिः । करणानुगृहीतप्रत्येकविधिविनियुक्तप्रयाजादीनामष्टदोषदुष्टविकल्पसमाधानाय सर्वाङ्गोपेतप्रधानकर्तव्यतां बोधयन् प्रधानविधिरेव प्रयोगविधिरित्युच्यते । यथा 'ज्योतिष्टोमेन यजेत' इत्येवमादिरेवेत्याकाराद्विवेक्तव्यम् । उत्पत्तिविधिस्त्रिविधः, कर्ममात्रोत्पादकः 'अग्निहोत्रं जुहोति' इत्येवमादिः । गुणविशिष्टकर्मोत्पादकः 'सोमेन यजेत' इत्येवमादिः । गुणमात्रोत्पादको 'द(२)ध्ना जुहोति' इत्येवेति । विनियोगविधिरपि त्रिधा—पूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति । यदाहुः—

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चाऽन्यत्र च प्राप्तौ परिसङ्ख्येति कीर्त्यते ॥

तत्राद्यो 'ज्योतिष्टोमेन यजेत स्वर्गकामः' इत्यादिः । द्वितीयो 'व्रीहीनवहन्ति' इत्यादिः । तृतीयः 'अश्वाभिधानीमादत्ते' इत्यादिः । भाष्ये तु 'पञ्च पञ्चनखा भक्ष्याः' इति तृतीयोदाहरणं प्रकृतकारि-

(१) परार्ध्य—इति ख. पुस्तके ।
(२) दध्नाऽग्निहोत्रं जुहोति—इति क. पुस्तके पाठः ।

काविस्तरभयान्न विव्रियते इति । अर्थवादास्तु स्तुतिनिन्दारूपाः । तत्राद्यो 'वायुर्वै क्षेपिष्ठा देवता' इत्यादिः । द्वितीयस्तु 'न तस्याऽऽहुतिमभ्यवहरन्ति य उदिते जुहोति' इत्यादिरित्याद्यन्यत्राऽनुसन्धेयमित्यास्तां प्रसक्तानुप्रसक्तिविस्तरः । पुराणादीनामुपसर्जनीकरणं वेदानां प्राधान्यसूचनाय । विद्यानां=पुरुषार्थसाधनज्ञानानाम् । अत एव धर्मस्याऽपि स्थानान्युपायाः विद्यायाः प्रवृत्तिद्वारा धर्मप्रयोजकत्वात् । यद्यप्यन्यत्राऽष्टादश विद्यास्थानान्युक्तानि । तथा च विष्णुपुराणम् ।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थं(१)च विद्या ह्यष्टादश स्मृताः ॥

तथापीह वेदशब्देनोपवेदरूपाणामायुर्वेदादीनां ग्रहणात् न न्यूनतेति बोद्धव्यम् । तेषां विद्यास्थानत्वेऽपि न धर्मस्थानत्वं धर्मे तात्पर्याऽभावादित्यप्याहुः । यत्तु ब्रह्मपुराणम्—

वेदान्तः पञ्चदशमं विद्या षोडशकं भवेत्-इति ।

तत्र वेदान्तः=शारीरकम् । विद्या=बृहदारण्यकादिरहस्यम् । ते चाऽत्र मीमांसावेदपदाभ्यामेव गृहीते इति सर्वं चतुरस्रम् ॥ ३ ॥

(मिता०) 'शौचाचारांश्च शिक्षयेत्' इत्याचार्यस्य धर्मशास्त्राध्यापनविधिः । शिष्येण तदध्ययनं कर्तव्यमिति कुतोऽवगम्यत इत्यत आह—

पुराणेति । पुराणं ब्राह्मादि । न्यायस्तर्कविद्या । मीमांसा वेदवाक्यविचारः । धर्मशास्त्रं मानवादि । अङ्गानि व्याकरणादीनि षट् । एतैरुपेताश्चत्वारो वेदाः । विद्याः (२)पुरुषार्थसाधनानि । तासां स्थानानि च चतुर्दश । धर्मस्य च चतुर्दश स्थानानि हेतवः। एतानि च त्रैवर्णिकैरध्येतव्यानि(३)तदन्तर्भूतत्वाद्धर्मशास्त्रमप्यध्येतव्यम् । (४)तत्रैतानि ब्राह्मणेन विद्याप्राप्तये धर्मानुष्ठानाय चाऽधिगन्तव्यानि । क्षत्रियवैश्याभ्यां धर्मानुष्ठानाय । तथाच शङ्खेन विद्यास्थानान्युपक्रम्योक्तम्—

(१) तु-इति ख० पुस्तके ।
(२) पुरुषार्थज्ञानानि क० पुरुषार्थसाधनज्ञानि ख० ।
(३) तदन्तर्गतत्वात् क० ।
(४) तत्र ब्राह्मणेनैतानि क० ।

'एतानि ब्राह्मणोऽधिकुरुते स च वृत्तिं दर्शयतीतरेषाम्' इति । मनुरपि द्विजातीनां धर्मशास्त्राध्ययनेऽधिकारो ब्राह्मणस्य प्रवचने नान्यस्येति दर्शयति (२।१६), (१।१०३)—

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य(१) कर्हिचित् ॥
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ।
शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित् ॥ इति ॥ ३ ॥

(वी०मि०)धर्मशास्त्रस्य प्रयोजनवत्त्वेऽपि प्रकृते किमायातमित्याशङ्क्य स्वसंहितायां धर्मशास्त्रत्वं दर्शयितुं तद्व्यवस्थार्थे धर्मशास्त्रप्रणेतृनाह—

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमाऽऽपस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥ ४ ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्र(२)योजकाः ॥ ५ ॥

उशन इत्यन्तमेकभावी द्वन्द्वः । प्रयोजकाः प्रणेतारः । वसिष्ठश्चेति चोऽनुक्तसमुच्चये, तेनाऽन्येषामपि ग्रहणम् ॥

तथा च शंखलिखितौ—स्मृतिर्धर्मशास्त्राणि तेषां प्रणेतारो मनुविष्णुयमदक्षाङ्गिरोऽत्रिबृहस्पत्युशनआपस्तम्बवसिष्ठकात्यायनपराशरव्यासशङ्खलिखितसंवर्तगौतमशातातपहारीतयाज्ञवल्क्यप्रचेतसादयः शिष्टाः ।

मनुर्बृहस्पतिर्दक्षो गौतमोऽथ यमोऽङ्गिराः ।
योगीश्वरः प्रचेताश्च शातातपपराशरौ ॥
संवर्त्तोशनसौ शङ्खलिखितावत्रिरेव च ।
विष्ण्वापस्तम्बहारीता धर्मशास्त्रप्रवर्तकाः ॥
एते ह्यष्टादश प्रोक्ता मुनयो नयतव्रताः ।
जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षिकाश्यपौ ॥
व्यासः सनत्कुमारश्च सुमन्तुश्च पितामहः ।
व्याघ्रः कार्ष्णाजिनिश्चैव जातूकर्णः कपिञ्जलः ॥

(१) कस्यचित्०क० ख० । (२) प्रवर्तकाः—इति क० पुस्तके ।

बौधायनश्च काणादो विश्वामित्रस्तथैव च ।
पैठीनसिर्गोभिलश्च उपस्मृतिविधायकाः ॥

तथा—

वसिष्ठो नारदश्चैव सुमन्तुश्च पितामहः ।
बभ्रुः कार्ष्णाजिनिः सत्यव्रतो गार्ग्यश्च देवलः ॥
जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः ।
आत्रेयः छागलेयश्च मरीचिर्वत्स एव च ॥
पारस्करऋष्यशृङ्गौ वैजवापस्तथैव च ।
इत्यन्ये स्मृतिकर्तार एकविंशतिरीरिताः ॥
एभिर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा ।
तान्येतानि प्रमाणानि न हन्तव्यानि हेतुभिः ॥

अत्र मन्वादिभिरष्टादशभिः प्रणीताः स्मृतयः,जावाल्यादिभिरष्टादश(१)भिस्तु प्रणीता उपस्मृतय इत्यवान्तरविभागवत्योऽपि भविष्ये-

मन्वादिस्मृतयो याश्च षट्त्रिंशत्परिकीर्तिताः ।

इति सामान्येनैवोक्ताः । वसिष्ठाद्येकविंशतिप्रणीतास्तु 'तथा स्मृत्यन्तरेषु च' इत्यनेनोक्ताः । वृद्धमनुवृद्धवसिष्ठवृद्धशातातपलघुहारीतयोगियाज्ञवल्क्यादयस्त्ववस्थाभेदेन सविशेषणसंज्ञाव्यपदेशभाजो मन्वादय एवेति न पृथगुक्ताः । एवञ्च(२)याज्ञवल्क्यप्रणीतत्वात्स्वकृतसंहिता धर्मशास्त्रमिति दर्शितम् ॥ ४ ॥ ५ ॥

(मिता०) अस्तु धर्मशास्त्रमध्येतव्यं, याज्ञवल्क्यप्रणीतस्याऽस्य शास्त्रस्य किमायातमित्यत आह—

मन्वत्रीति । पाराशरेति च । उशनःशब्दपर्यन्तो द्वन्द्वैकवद्भावः । याज्ञवल्क्यप्रणीतमिदं धर्मशास्त्रमध्येतव्यमित्याभिप्रायः । नेयं परिसंख्या(३) किन्तु प्रदर्शनार्थमेतत् । अतो बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धम् । एतेषां प्रत्येकं प्रामाण्येऽपि साकाङ्क्षाणामाकाङ्क्षापरिपूरणमन्यतः क्रियते । विरो(४)धे विकल्पः ॥ ४ ॥ ५ ॥

---

(१) अष्टादशभि—इति क० पुस्तके नास्ति ।

(२) च—इति ख० पुस्तके नास्ति ।

(३) परिसंख्या नाम एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचनम् । एतद्विस्तरोऽग्रे ८१ श्लोकमिताक्षरायां द्रष्टव्यः ।

(४) विरोधे तु ख. ।

(वी० मि०) इदानीं धर्मस्य साक्षाद्धेतून् देशादीन् प्रदर्शयन्नेव स्वरूपमप्याह—

देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् ॥
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥ ६ ॥

देशः–कुरुक्षेत्रादिः । कालः–सूर्योपरागादिसमयः । उपायः–इतिकर्तव्यता । द्रव्यं–हिरण्यादि । श्रद्धा–वैदिककर्मणि फलावश्यंभावानिश्चयः, तया सम्यक् हेतुभावेनाऽन्वितं यथा स्यात् । पात्रं– श्रोत्रियादि वक्ष्यमाणम् । सप्तमी चेह चतुर्थ्यर्थे । प्रदीयत इति दानं ससम्प्रदानकस्त्यागः, स्वस्वत्वध्वंसपरस्वत्वोत्पत्तिफलको विक्रयादिव्यावृत्त इच्छाविशेषो वा । तत्र प्रकर्षः प्रत्युपकारादिप्रतिसन्धानराहित्यं जातिगुणादिरूपदानोपयोगि तत्तन्निमित्तसाचिव्यञ्च । अत्र(१)दानं चतुर्षु धर्मचरणेषु युगचतुष्टयावस्थायित्वेन प्राधान्यादुदाहरणम् । शास्त्रदेशिततत्तत्स्वकारकसंवलितानां यागहोमादीनां सर्वेषामुपलक्षणम् । यदिति देशादिरूपकारकविशिष्टक्रियापरामर्शः । तदिति यच्छब्दाऽव्यवहितोत्तरस्थस्य तच्छब्दस्य 'यत्तदूर्जितम्' (वे०सं०१।१३) इत्यादाविवोत्सर्गतः प्रसिद्धपरामर्शकत्वेऽपि 'मयि क्रूरे यत्तत्साविषयमिव' इत्यादाविव तदपवादेन यच्छब्दानिर्दिष्टार्थनिर्देशतैवेति स्मर्तव्यम् । सकलं–सम्पूर्णम् । धर्मलक्षणं–तत्स्वरूपं शास्त्रदेशितसम्पूर्णफलसम्पादकत्वात् । देशाद्येकैकादिरहितं तु विफलं विफलतरं विफलतमं, तादृक्फलासाधकत्वादित्याशयः । एवञ्च यागादिरूपो धर्मो यद्यदङ्गविशिष्टो विध्युपदिष्टः तत्समुच्चयं वाऽनुष्ठेयः । अङ्गा(२)नां विरोधे नैराकांक्ष्ये च विकल्पः, अनन्यगतिकत्वादनाकाङ्क्षिताऽनन्वयाच्च । यदाहुः—

विरोधे तु विकल्पः स्यात् इति ।

स्मृतिशास्त्रविकल्पस्तु आकाङ्क्षापूरणे सति । इति च ।

परन्त्वावश्यके कर्मणि शक्यानामेव काम्ये तु सर्वेषामङ्गानामुपसंहारः । सर्वशक्तिनयात्सङ्कल्पितं काम्यमपि नित्यवदेव । यत्र तु काम्ये अङ्गवैगुण्येऽपि कुतश्चिन्निमित्तात्सम्पूर्णफलता

(१) अन्नदानम् इति ख. पुस्तके पाठः ।

(२) अङ्गानि–इति ख. पुस्तके पाठः ।

ऽल्पफलता वा शास्त्रे देशिता तत्र तदर्थिना तादृगेवाऽऽचरणीय-यमिति विवेकः ॥ ६ ॥

(मिता०) इदानीं धर्मस्य कारकहेतूनाह-

देश इति । देशो यस्मिन्देशे मृगः कृष्ण इत्युक्तलक्षणः । कालः सङ्क्रान्त्यादिः । उपायः शास्त्रोक्तेतिकर्तव्यताकलापः । द्रव्यं प्रतिग्रहादिलब्धं गवादि । श्रद्धा आस्तिक्यबुद्धिस्तदन्वितं यथा भवति तथा । पात्रं न विद्यया केवलयेत्येवमादिवक्ष्यमाणलक्षणम् । प्रदीयते यथा न प्रत्यावर्तते तथा परस्वत्वापत्त्यवसानं त्यज्यते । एतद्धर्मस्योत्पादकम् । किमेतावदेव नेत्याह—सकलमिति । अन्यदपि शास्त्रोक्तं जातिगुणहोमयागादि तत्सकलं धर्मस्य कारकं, जातिगुणद्रव्यक्रियाभावार्थात्मकं चतुर्विधं धर्मस्य कारकमित्युक्तं भवति । तच्च समस्तं व्यस्तं वा यथाशास्त्रं द्रष्टव्यम् । श्रद्धा सर्वत्रानुवर्तत एव ॥ ६ ॥

(वी० मि०) सम्प्रति पुराणादिभ्यः पूर्वोक्तेभ्यो निष्कृष्य प्रधानीभूतं धर्मे प्रमाणं(१) दर्शयन्नेव प्रदीयत इत्यनेन कर्ममात्रोपलक्षणे लौकिकभोजनादेरपि धर्मरूपताप्रसक्तिं व्युदसितुमुपलक्ष्यतावच्छेदकं धर्मलक्षणमि(२)त्याह—

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥
सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्॥ ७ ॥

श्रुतिर्वेदः । स्मृतिर्धर्मशास्त्रम् । यदाह मनुः—

श्रुतिश्च (३)वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः ।

सदाचारः ।

साधवः क्षीणदोषाः स्युः सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते ॥

इति विष्णुपुराणे दर्शितः । आचरणमलौकिकं तेन लौकिकभोजनादिव्युदासः । स्वस्य प्रियं प्रीतिः कारणेन कार्यलक्षणात्, धर्मसन्देहे वैदिकसंस्कारवासितात्मनामेकत्र पक्षे मनःपरितोष इति यावत् ।

(१) प्रधाने—इति क. पुस्तके पाठः ।
(२) मप्याह— इति ख. पुस्तके ।
(३) स्तु—इति ख. पुस्तके पाठः ।

यदाहुर्भट्टपादाः—

एतेन वैदिकानेकधर्मश्रीसंस्कृतात्मनाम् ।
आत्मतुष्टेः प्रमाणत्वं सिद्धं धर्मप्रसिद्धये ॥ इति ।

आत्मन इति न तु सर्वस्य । एतच्चैकदेशभू(१)मतेऽपि धर्मेऽन्वितं योग्यताबलात् । सम्यक् सङ्कल्पात् रागद्वेषादिरहितात् ज्ञा(२)नात् जातः कामो ब्राह्मणोपचिकीर्षादिः ।

अद्रोहः सर्वभूतानां कर्मणा मनसा गिरा ।
अनुग्रहश्च ज्ञानञ्च शीलमेतद्विदुर्बुधाः ॥

इति महाभारतादौ शीलपरिगणनेऽनुग्रहादिशब्देनोक्तः । इदम्-एते । मूलमिति विधेयलिङ्गसङ्ख्याग्रहणात् तच्च पञ्चस्वन्यापेक्षया प्रधानीभूतेष्वपि श्रुत्यादिषु एकस्य श्रुतिरूपस्य प्रमाणस्याऽतिप्राधान्यसूचनाय धर्ममूलं धर्मे प्राधान्येन प्रमाणम् । प्राधान्यं च साक्षाद्बोधकतया । तथा च मनुः—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

साक्षात् श्रुत्यनुग्राहकतया लक्षणं प्रमाणम् । यद्यपि—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

इति मनुनैव शीलमप्यधिकमुक्तं तथाऽपि (३)तस्याऽद्रोहादिरूपस्य भारतोक्तस्य ब्रह्मण्यता देवपितृभक्तता सौम्यता ऽपरोपतापिता ऽनसूयता मृदुता ऽपारुष्यं मित्रता प्रियवादिता कृतज्ञता शरण्यता प्रशान्तिश्चेति त्रयोदशविधं शीलमिति । ब्रह्मण्यतादेः हारीतोक्तस्य च शीलस्याऽऽचार एवान्तर्भावान्नाऽत्र पृथगुक्तम् । देवभक्तता पितृभक्तता चेति द्वे । प्रायः परोपकारपर्यवसायितया ऽऽचारान्तरादभ्यर्हितत्वेन वचनान्तरे 'गोबलीवर्द' न्यायाद्भेदेनोपन्यस्तम् । एवं सम्यक् सङ्कल्पजः काम इति प्रकृतवाक्येऽपि बोद्धव्यम् । तत्र च (४)श्रुतिरग्निहोत्रादौ । स्मृतिरन्वष्टकादौ । आचारो होलकादौ । आत्मतुष्टि-

---

(१) भूपतेऽपि—इति क० ख० पुस्तकयोः पाठः ।
(२) जनात्-इति क० पुस्तके पाठः ।
(३) अपि-इत्यधिकं ख० पुस्तके ।
(४) च-इति क. पुस्तके नास्ति ।

रभ्यासादि(१)सन्देहविषयप्रायश्चित्तव्रतादौ । तथा च प्रायश्चित्तप्रकरणे बृहस्पतिः—

यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवम् ।
तस्मिँस्तावत्पुनः कुर्याद्यावत्तुष्टिकरं भवेत् ॥ इति ।

अलाघवं पापशून्यताप्रतिसन्धानविरहः, तन्निबन्धनोऽपरितोष इति यावत् । अव्यवस्थितविकल्पविषयप्राङ्मुखोदङ्मुखाचमनादावेव मनस्तुष्टिः स्वविषये ऽन्यतरस्मिन् धर्मे प्रमाणमिति बहवः । तुष्टिस्तु यस्य तस्यैव धर्मे प्रमाणमित्युक्तम् । कामस्तु प्रत्यक्षश्रुत्याद्यबोधिते ब्राह्मणोपकार (२)विशेषादौ भोजनव्यतिरेकेण मया जलपानं न कर्तव्यमित्याद्याकारस्तदकरणादाविति तु विश्वरूपः। अत्र पुराणादीनां स्वर्गादिकथाप्राधान्यादितिहासबहुलत्वेनाऽर्थवादादिरूपतया न्यायमीमांसयोस्तर्कद्वारा शिक्षादीनामङ्गानां तत्तदुपकारसम्पादनेन वेदाऽनुग्राहकतया धर्मे प्रामाण्यं न साक्षादिति न तान्यत्र गणितानि । स्मृत्यादयस्तु श्रुतिमनुमापयन्तो ऽपि तामननुगृह्णन्त एव धर्मे प्रमाणमिति तेषामत्र ग्रहणमिति विवेक्तव्यम् । एवं श्रुतिप्रमाणकधर्मस्य लक्षणमपि दर्शितम् । (३)स्मृत्यादिमूलकस्याऽपि धर्मस्याऽवश्यापेक्षितवेदप्रमाणकत्वात् । सर्वेषां वेदानां मुख्यतो धर्म एव तात्पर्यपर्यवसानेन तत्रैव प्रामाण्यात् । 'चोदनालक्षणोऽर्थो धर्मः'(जै० सू० १।१।२) इति सूत्रे तु कलञ्जभक्षणादेरधर्मस्यापि चोदनालक्षणत्वमङ्गीकृत्याऽर्थपदेन वारणं कृतमित्यवधेयम् ॥ ७ ॥

(मिता०) इदानीं धर्मस्य ज्ञापकहेतूनाह—

श्रुतिरिति । श्रुतिर्वेदः । स्मृतिर्धर्मशास्त्रम् । तथा च मनुः (२।१०) श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः इति । सदाचारः सतां शिष्टानामाचारोऽ(४)नुष्ठानम् । स्वस्य चात्मनः प्रियं, वैकल्पिके विषये यथा 'गर्भाष्टमेऽष्टमे वाब्दे' इ(५)त्यादावात्मेच्छैव नियामिका ।

(१) अभ्यासाऽनभ्यासादि–इति ख० पुस्तके पाठः ।

(२) ब्राह्मणोकार–इति क० पुस्तके, ब्राह्मणोपरोपकार–इति तु ख० पुस्तके पाठः ।

(३) श्रुत्यादि–इति ख० पुस्तके ।

(४) ऽनुष्ठानं नाशिष्टानाम् ख० ।

(५) इत्यत्रात्मेच्छैव, इत्यादिष्वात्मेच्छैव ख० ।

सम्यक्संकल्पाज्जातः कामः शास्त्राविरुद्धो (१)यथा-'मया भोजनव्यतिरेकेणोदकं न पातव्यम्' इति। एते धर्मस्य मूलं प्रमाणम्। एतेषां विरोधे पूर्वपूर्वस्य बलीयस्त्वम्॥ ७॥

(वी० मि०) नन्विदं धर्मलक्षणमात्म(२)तत्त्वसाक्षात्कारेऽतिव्यापकम्। न च सोऽपि धर्म एव यागादीनामिव कर्मकाण्ड एव व्युत्पादनप्रसङ्गादित्याशङ्कायामाह—

इज्याऽऽचारदमाहिंसादानस्वाध्यायकर्मणाम्॥
अयन्तु परमो धर्मो यद्योगेनाऽऽत्मदर्शनम्॥ ८॥

इज्या-यागः। आचारः-आह्निकादिः। दमः-इन्द्रियनिग्रहः। अहिंसा-विहितातिरिक्तहिंसाविरहः। दानम्-उक्तम्। स्वाऽध्यायः-वेदाऽध्ययनम्। कर्म-इज्याद्यतिरिक्तं होमादि, 'गोबलीवर्द'न्यायात् पृथगुक्तम्। तेषां मध्ये योगेनाऽष्टाङ्गेन तु मनःसन्निकर्षमात्रेण यदात्मदर्शनम्-आत्मतत्त्वसाक्षात्कार इति फलितार्थः। सोऽयं परमो धर्मः। 'पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा'(रघु०८।४) इत्यादौ प्रक्रंस्यमानलिङ्गस्याऽपि प्रक्रान्तलिङ्गस्येव सर्वनाम्ना ग्रहणदर्शनान्न लिङ्गाऽसङ्गतिः। क्वचिद(३)यं त्विति पाठः। तत्र तुशब्दः कर्मणामित्यनन्तरं योज्यः, तेन-

तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च।
युगपत्त्रितयाऽभ्यासाज्जीवन्मुक्तिर्दृढा भवेत्॥

इत्युक्ताभ्यासावच्छेदः। तस्य तत्त्वसाक्षात्कारादप्युत्कर्षाद्य(४)थाश्रुतक्रमे कर्मणामिति निर्द्धारणषष्ठ्येव। तुशब्दस्य गतार्थत्वादित्यवधेयम्। यद्वा कर्मणामिति शेषषष्ठी इज्यादिकर्मसम्बन्धितन्निमित्तकमात्मदर्शनमित्यर्थः। 'तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इत्यादिश्रुतेः। परमत्वं त्वात्मदर्शनस्य। सकलप्रयोजनमौलिभूतमोक्षान्तरङ्गत्वादिज्यादीनामपि तादर्थ्यात्तत्तदवान्तरफलस्य स्वर्गादेरानुषङ्गिकत्वात्। तथा चैतेनोत्कर्षेणेज्यादिधर्मे-

(१) शास्त्राविरुद्धः कामो यथा ख०।
(२) तत्त्व-इति क० पुस्तके पाठः।
(३) क्वचिदयात्विति-इति ख० पुस्तके पाठः।
(४) तथा-इति ख० पुस्तके पाठः।

भ्यो नि[१]ष्कृष्य धर्मरूपस्यात्मदर्शनस्य ज्ञानकाण्डे ऽभिधानमिति सर्वं चतुरस्रम् । क्वचित्तु कर्मणामित्यत्र कर्म वेति । स इत्यत्र चेति पठितं व्याख्यातं च धर्मस्वरूपमाह—इज्येति प्रदर्शनमात्रमेतत् । तेन वैदिकं सर्वं धर्मधर्मः, आत्मदर्शनञ्च प्रकृष्टो धर्म इति । देशे काल इत्यादिवचनं तु धर्मकारकप्रदर्शनमात्रपरतयैवाऽवतारितमिति तदनञ्जसम् ॥ ८ ॥

(मिता०) देशादिकारकहेतूनामपवादमाह-

इज्येत्यादि । इज्यादीनां कर्मणामयमेव परमो धर्मः, यद्योगेन बाह्यचित्तवृत्तिनिरोधेनात्मनो दर्शनं याथातथ्यज्ञानम् । योगेनात्मज्ञाने देशादिनियमो नास्तीत्यर्थः । तदुक्तं 'यत्रैकाग्रता तत्राविशेषात्' इति पातञ्जले ॥ ८ ॥

(वी० मि०) ननु श्रुतिः स्मृतिः सदाचार इत्यादिधर्मप्रमाणगणनं नूनं धर्माऽधर्मसन्देहस्थले तन्निर्णायकत्वेन बहुशः शास्त्रबोधितस्य पर्षदादिवचनस्याऽनभिधानादित्याऽऽशङ्क्य शिष्टविशेषसमुदायादिरूपं पर्षदादिस्वरूपं प्रदर्शयन्नेव [२] न केवलं सदाचारशब्देन शिष्टानां कायक्रियैवाऽत्राऽभिप्रेता किन्तु नामवचनमपीति न न्यूनत्वमित्यभिप्रयन्नाह—

चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा(३) ।
सा ब्रूते यं स धर्मः स्यादेको (४)वाऽध्यात्मवित्तमः ॥९॥

वेदा—ऋगादयः । धर्मा—धर्मशास्त्राणि । तज्ज्ञाश्चत्वारः पर्षत् । ते च ब्राह्मणा ग्राह्याः । तथा च मनुः—

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥

तिस्रो विद्या वेदा येषान्ते त्रिविद्याः तेषां समूहस्त्रैविद्यं भिक्षादित्वादण् तद्वा पर्षत् । तथा च मनुः—

(१) निष्टस्य-इति ख० पुस्तके ।
(२) च-इति ख० पुस्तके नास्ति ।
(३) च-इति क० पुस्तके ।
(४) एकोऽप्यध्यात्मवि-इति क० ख० पुस्तकयोः पाठः ।

ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च।
त्र्यवरा परिषत् ज्ञेया धर्मसंशयनिर्णये॥

त्रयोऽवराश्चरमः पक्षो यस्यां सा। एतेन संख्यान्तरमपि सूचितम्। (१)तथा चाऽङ्गिराः—

एकविंशतिसंख्यातैर्मीमांसान्यायपारगैः।
वेदार्थकुशलैश्चैव परिषत्त्वं प्रकल्पयेत्॥

मनुः—

त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः।
त्रयश्चाऽऽश्रमिणः पूर्वे परिषत्स्याद्दशावरा॥

त्रैविद्यस्त्रयवित्ता। हैतुकोऽनुमानज्ञः। तर्की सत्तर्कक्षुण्णमतिः। तथा च मनुः—

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः॥

नैरुक्तो निरुक्तज्ञः। धर्मपाठको धर्मशास्त्राभिज्ञः प्रायश्चित्तादिनिर्देष्टा-यमनुवादक इति लोका वदन्ति पठन्ति च—

वेदविद्याव्रतस्नातः सत्यसन्धो जितेन्द्रियः।
अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः॥

पूर्वे ब्रह्मचारिगृहस्थवानप्रस्थाः एते च कल्प्याः कार्यलाघवगौरवयोः गुणप्रकर्षनिष्कर्षयोश्च तारतम्येन व्यवस्थाप्याः। सर्वं (२) चेदं प्रदर्शनार्थम्। यावद्भिर्यत्र धर्मनिरूपणं सम्भवति तावद्भिस्तत्र परिषत्। अत एव यमः—

एको द्वौ वा त्रयो वापि यद् ब्रूयुर्धर्मपाठकाः।
स धर्म इति विज्ञेयो नेतरेषां सहस्रशः॥

इत्यास्तां विस्तरः। प्रकृतमाह सा पर्षत् यं धर्म इति ब्रूते स धर्मः। अध्यात्मवित्तमः—आत्मानमधिकृत्य प्रवृत्तं शास्त्रमध्यात्मं तद्विदां श्रेष्ठः आत्मतत्त्वसाक्षात्कारवानिति यावत्। एकोऽपि यं ब्रूत इत्याद्यनुषञ्जनीयम्। पर्षदादिवचनमिव 'स्त्रीभ्य(३)श्चावरवर्णेभ्यो धर्मशेषान् प्रतीयात् इत्येक इत्येके' (आप० ध० सू० २। २९। १५) इत्यक

(१) यथा—इति क० पुस्तके।
(२) वेदं—इति क. पुस्तके।
(३) स्त्रीभ्यस्सवर्णेभ्यश्च—इति 'मयसूर्राजकीयसंस्कृतपुस्तकमाल।'मुद्रितपुस्तके पाठः।

इत्यापस्तम्बोक्तश्रीशूद्राद्याचारोऽपि वेदाद्यविरुद्धः परम्पराप्राप्तः सदाचारश(१)ब्देनैव सङ्ग्राह्यः । एकः–इत्यनेनाऽन्यादृशतदाचारेऽस्वरसः सूचितः । न च स्त्र्यादीनां निरुक्तसत्त्वाभावात् शास्त्रविरोधश्च(२) कथमेवमिति वाच्यं, क्षीणदोषत्वेन प्रकृतार्थे भ्रान्तेरुपलक्षणात् । अन्यथेदानीन्तनानां प्रायशो ऽव्यापनात् । शास्त्रविरोधश्च सर्वथैव सदाचारेषूपसंहर्त्तव्यः । अन्यथेन्द्रकृताहल्यासङ्गमादेव (३)शिष्टकृताक्षमालोपयमा[४] देश्च धर्मे प्रामाण्यापत्तेः । अत एव महाभारते—

कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा ।
न चरेत्तानि धर्मात्मा श्रुत्वा चाऽपि न कुत्सयेत् ॥

इत्यास्तामतिविस्तरः ॥ ९ ॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजमधुकरसाहिसुनुश्रीमन्महाराज
चतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकर
श्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मज श्रीपरशुराम-
मिश्रसूरिसूनुसकलविद्यापारावारपारीणधु-
रीणश्रीमन्मित्रमिश्रकृते श्रीवीरसिंह-
मित्रोदयाख्याने श्रीयाज्ञवल्क्य-
व्याख्याने उपोद्घात-
प्रकरणम् ॥ १ ॥

(मिता०) कारकहेतुषु ज्ञापकहेतुषु वा सन्देहे निर्णयहेतूनाह—

चत्वार इति । चत्वारो ब्राह्मणाः वेद(५)धर्मशास्त्रज्ञाः पर्षत् । तिस्रो विद्या अधीयन्त इति त्रैविद्यास्तेषां समूहस्त्रैविद्यम् । धर्मशास्त्रज्ञत्वमत्राऽप्यनुवर्तते तद्वा पर्षत् । सा पूर्वोक्ता पर्षत् यं ब्रूते स धर्मः । अध्यात्मज्ञानेषु निपुणतमो धर्म(६)शास्त्रज्ञश्च एकोऽपि वा यं ब्रूते सोऽपि धर्म(७) एव ॥ ९ ॥

इत्युपोद्घातप्रकरणम् ।

—:*:—

(१) धर्मेणैव -इति क. पुस्तके । (२) शास्त्रविरोधश्च-इति क. पुस्तके नास्ति ।
(३) र्षा इति क. पुस्तके । (४) सा—इति क. पुस्तके. ।
(५) वेदशास्त्रधर्मज्ञाः ख. (६) वेदधर्मशास्त्रज्ञश्च ख. (७) सोपि धर्मः ख.

अथ ब्रह्मचारिप्रकरणम् २

(वी०मि०) अथ वर्णधर्मेषु वक्तव्येषु वर्णानाह—

ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ॥
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ॥ १० ॥

ब्रह्म=ब्राह्मणः । क्वचिद्विप्रेतिपाठः । कर्माधिकारिविभागाय द्विजान् विविनक्ति-'त्वाद्यास्त्रयो द्विजाः'-अत्र तुशब्दस्य वर्णा इत्युत्तरं पाठात् स्वरूपस्य आद्या इत्यनन्तरं योजनादर्थस्य सङ्गतिः । तेषामाद्यास्तु त्रयो द्विजाः द्विर्जायन्त इति व्युत्पत्तेः । तथा च वक्ष्यति-मातुर्यदग्र इत्यादि (१।३९) । अत्र वृत्तीनामनभिव्यक्तलिङ्गसङ्ख्यत्वात् ब्राह्मणाश्च क्षत्रियाश्चेत्यादिविग्रहेऽपि प्रकृतसमासोपपत्तेराद्या इत्यनेन ब्राह्मणा एवोक्ता इति भ्रमनिरासाय त्रय इत्युक्तम् । वर्णा इत्यनुषङ्गेऽपि त(१)न्नि-रासात् । तत्र च ब्रह्मव्यक्तिषु तिसृषु अनवध्यवसायाद्व्याप्त्यानन्त्याच्च ब्राह्मणत्वक्षत्रियत्ववैश्यत्वाद्येवाऽऽदाय त्रित्वपर्यवसानमिति । अत्रैव मनुः—

चतुर्थ एकजातिस्तु वर्णो नास्ति तु पञ्चमः ।

चतुर्थः शूद्रः वर्णशुद्धः । वर्णसङ्करस्त्वस्त्येव, वर्णसङ्करो न वर्णान्तर्गत इत्यप्याहुः । तत्र द्विजानां शूद्रादिभ्यो धर्मे विशेषमाह—

निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ।

निषेको गर्भाधानं तदाद्याः श्मशानं तत्सम्बन्धिन्यन्त्येष्टिः तदन्ताः क्रिया मन्त्रतो मन्त्रकरणिकाः । तेषां वै द्विजानामेव, न तु शूद्रस्याऽपि । अमन्त्रकास्तु तस्याऽपि क्रियाः । अत एव चूडाकरणान्ताः क्रियाः प्रकृत्य यमः—

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः ।
न केन चित्समसृजत छन्दसा तं प्रजापतिः ॥

शूद्र इति लिङ्गमविवक्षितमनुपादेयगतत्वात् । एवंविधः=चूडान्तक्रिया-वान्-अत एव संस्कृतः कार्यः । मन्त्रेण वैदिकेन'वेद(२)मन्त्रवर्ज'—मित्येकमूलताऽनुरोधात् । केन चिद्गायत्र्यादिना प्रजापतिर्ब्रह्मा तं

(१) अपि इति ख. पुस्तके पाठः । (२) वेद इति ख. पुस्तके नास्ति ।

शूद्रं समसृजत् संयोजयामास तेनोपनयनं नास्तीत्यर्थः । तथा च श्रुतिः-'गायत्र्या ब्रा(१)ह्मणं समसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केन चिच्छन्दसा शूद्र' मिति । एवञ्च—

विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदा ।

इति ब्रह्मपुराणे मात्रपदेन उपनयनस्य वैदिकमन्त्रस्य वा व्यवच्छेदो, न गर्भाऽऽधानादीनामपीति मन्तव्यम् ॥ १० ॥

(मिता०) एतैर्नवभिः श्लोकैः सकलशास्त्रोपोद्घातमुक्त्वा इदानीं वर्णादीनां धर्मान्वक्तुं प्रथमं तावद्वर्णानाह—

ब्रह्मेत्यादि । ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा वक्ष्यमाणलक्षणास्तेषामाद्यास्त्रयो ब्राह्मणक्षत्रियवैश्या द्विजाः द्विर्जायन्त इति द्विजाः तेषां द्विजानां वै एवं न शू(२)द्रस्य । निषेकाद्याः निषेको गर्भाधानमाद्यो यासां तास्तथोक्ताः । श्मशानं पितृवनं तत्सम्बन्धि कर्म अ(३)न्ते यासां ताः क्रिया मन्त्रैर्भवन्ति ॥ १० ॥

(वी०मि०)उक्ता एव निषेकादिक्रियाः कालविशेषसम्बन्धेनाऽन्वक्रामन् । तासां फलमप्याह सार्धश्लोकाभ्याम्—

गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा ॥
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च ॥ ११ ॥

गर्भ आधीयतेऽनेनेत्यादिव्युत्पत्तिभिर्गर्भाधानादिशब्दैस्तत्तत्संस्कारकर्माण्युच्यन्ते । ऋतौ=वा वक्ष्यमाणे काले । पुमा(४)न् सूयतेऽनेनेति पुंसवनं पुंसः सवनमित्यनेनोक्तम् । स्पन्दनात्=गर्भचलनात् । पूर्वं=तृतीये मासीत्यर्थः । 'चतुर्थे स्पन्दते ततः' इति वचनात् । गर्भमासात् षष्ठेऽष्टमे वा=मासि सीमन्तोन्नयनम् । एते=आ(५)इते वहिर्गते गर्भकोशात् अपत्ये सति जन्मनि जातकर्म इत्यर्थः । 'प्रसवे जातकर्म च'-इति पाठः सुगमः । चशब्देन (६)प्रसङ्गादपत्यजन्मकालकृत्यानामन्येषां कर्मणां समुच्चयः । यद्वा—अग्रिमश्लोकस्यैकादश इत्यनन्तरं संयोज्यमानो·

---

(१) ब्रह्मणं-इति ख० पुस्तके ।   (२) न शूद्राणां क.   (३) अन्तो यासां क.
(४) पुमांसं-इति क. ख. पुस्तकयोः पाठः ।   (५) आहते-इति क. पुस्तके, आयते-इति तु ख. पुस्तके. । (६) चशब्दैस्तत्कारकर्माण्युच्यंते, ऋतौ वा वक्ष्यमाणे काले पुमांसं सूयते प्रसङ्गात्-इत्यधिकः ख. पुस्तके पाठः ।

ऽत्राऽनुक्तान् द्वादशादीन् समुच्चिनोति ते च दर्शयिष्यन्ते ॥ ११ ॥ *

अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः ॥
षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम् ॥ १२ ॥

(वी०मि०) एकादशे जन्मदिनात्, एतच्च सूतकान्तोपलक्षणम् । 'आशौचव्यपगमे नामधेयकरणम्' इति विष्णुवचनात् । अत्र श्रुतिः— 'एकादशे द्वादशे वा पिता नाम कुर्यात्' । मनुः—

नामधेयं दशम्यान्तु द्वादश्यां वाऽस्य कारयेत् ।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥

दशम्यां तिथौ=दशम दिन इति यावत् । एतच्चाशौचापकर्षे दशम्यामुपस्थाप्य ब्राह्मणान् भोजयित्वा पिता—

नामधेयं दशम्यान्तु केचिदिच्छान्ति पार्थिव ।
द्वादश्यामपरे रात्र्यां मासे पूर्णे तथा परे ॥
अष्टादशेऽह्नि च तथा वदन्त्येके मनीषिणः ।

रात्रिपदमहोरात्रपरम् । गोभिलः—'जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयकरणम्' । व्युष्टेऽतीते । अत्र कालविकल्पे व्यवस्थेति वक्ष्यते(१) । निष्क्रमः सूर्यस्य चन्द्रमसो वा दर्शनार्थमपत्यस्य सूतीगृहान्निस्सरणं चतुर्थे मासि । एतच्च छन्दोगानाम् । 'जननाद्यस्तृतीयो ज्यौत्स्नस्तस्य तृतीयायाम्' इति गोभिलवचनात् । ज्यौत्स्नः शुक्लपक्षः । 'षष्ठेऽन्नप्राशनं मासि' इति प्रथमः कल्पः ।

ततोऽन्नप्राशनं कार्यं मासि षष्ठे यथाविधि ।
अष्टमे वाऽपि कर्तव्यं यद्वेष्टं मङ्गलं कुले ॥

इति ब्रह्मपुराणे कालान्तरस्याऽपि विधानात् । लौगाक्षिरपि —'षष्ठे मासेऽन्नप्राशनं जातेषु दन्तेषु वा' । चूडा—चूडाकर्म । यथाकुलं कुलाचाराऽनुसारेण द्वितीये तृतीये वा ऽब्दे । तथा च मनुः—

ततः संवत्सरे पूर्णे चूडाकर्म विधीयते ।
द्वितीये वा तृतीये वा कर्तव्यं श्रुतिदर्शनात् ॥

---

* एकादशद्वादशश्लोकयोर्मिताक्षराख्या व्याख्या त्वेकत्र सम्बद्धेति द्वादशात् श्लोकादुत्तरमुभयोरपि मिताक्षरा द्रष्टव्या ।

(१) वक्ष्यते-इति क. पुस्तके नास्ति ।

द्वितीये पूर्णे इत्यनुषज्यते । तृतीये ऽल्पाऽवशिष्टे 'तृतीये भूयिष्ठे गते चूडा' इति लौगाक्षिवचनात् । इदञ्च तृतीयस्यैव चरमभागप्रशंसापरमिति न पौनरुक्त्यम् । कार्येति विभक्तिविपरिणामेन गर्भाधानादिषु उपनयनान्तेष्वप्यन्वेति । नाम्नस्तु करणं व्यवस्थापनमात्रमिति विशेषः । न च चूडापदवन्नामपदमपि कर्मविशेषपरमेवाऽस्त्विति वाच्यं, प्रामाणिकलिखनविरोधादिति ॥ १२ ॥

(मिता०) इदानीं ताः क्रिया अनुक्रामति—

गर्भाधानमिति । अहनीतिच । गर्भाधानमित्यनुगतार्थं कर्मनामधेयम् । एवं वक्ष्यमाणान्यपि । तद्गर्भाधानमृतौ ऋतुकाले वक्ष्यमाणलक्षणे । पुंसवनाख्यं कर्म गर्भचलनात्पूर्वम् । षष्ठेऽष्टमे वा मासि सीमन्तोन्नयनम् । एते च द्वे पुंसवनसीमन्तोन्नयने क्षेत्रसंस्कारकर्मत्वात्सकृदेव कार्ये न प्रतिगर्भम् । यथाऽऽह देवलः—

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।
यं यं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेत् ॥ इति ।

यद्वा एते=आ इते आगते गर्भकोशाज्जाते कु(१)मारे जातकर्म । एकादशेऽहनि ना(२)म । तच्च पितामहमातामहादिसम्बद्धं कुलदेवतासम्बद्धं वा । यथाह शङ्खः–'कुलदेवतासम्बद्धं पिता नाम कुर्यात्' इति । चतुर्थे मासि निष्क्रमणलक्षणं सूर्यावेक्षणं कर्म । षष्ठे मास्यन्नप्राशनं कर्म । चूडाकरणं तु यथाकुलं कार्यमिति प्रत्येकं सम्बध्यते ॥ ११ ॥ १२ ॥

(वी०मि०)उक्तक्रियाणामावश्यकत्वे ऽप्यानुषाङ्गिकं फलमाह—

एवमेनः शमं याति बीजगर्भसमुद्भवम् ॥

एवं=एवंकृते बीजं शुक्रं शोणितं च, गर्भस्तदाशयः, तत्समुद्भवन्तत्सम्बन्धि । एनो ऽशुचित्वमपत्यस्य । अत्र गर्भाधानादित्रयं क्षेत्रसंस्कारद्वारा ऽपत्यसंस्कारकम् । क्षेत्रसंस्कारश्च प्रथमगर्भ एव जात इति न प्रतिगर्भमावर्तनीय, 'आरम्भणीया' न्यायात् । तथा च हारीतः—

सकृच्च कृतसंस्काराः सीमन्तेन द्विजस्त्रियः ।
यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत् ॥

---

(१) कुमारे जाते ख. (२) नामकरणम् ख.

सीमन्तेन तदन्तकर्मणा, न्यायतौल्यात् । वचनस्य चाऽस्य न्यायमूलकत्वात् । द्विजेति चोपलक्षणम् । अत एव—

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।

इति देवलेन संस्कृतेति नारीति च सामान्येनैवोक्तम् । जातकर्मादि तु साक्षादेवाऽपत्यसंस्कारकमिति प्रत्यपत्यमावर्तनीयमिति विवेकः । द्विजसंस्कारे तूपनयनमप्यधिकम् ।

गार्भैर्होमैर्जातकर्म चौडमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते । इति मनूक्तेः ।

गार्भैर्होमैरिति तु पुंसवनादीनामप्युपलक्षणम् ॥

(मिता०) एतेषां नित्यत्वेऽप्यानुषङ्गिकं फलमाह—

एवमिति । एवमुक्तेन प्रकारेण गर्भाधानादिभिः संस्कारकर्मभिः कृतैरेनः पापं शमं याति । किंभूतम् । बीजगर्भसमुद्भवं शुक्रशोणितसम्बद्धं गात्रव्याधिसङ्क्रान्तिनिमित्तं वा न तु पतितोत्पन्नत्वादि ॥

(वी०मि०)द्विजस्त्रीणां द्विजेभ्यः शूद्रादिभ्यश्च विशेषमाह—

तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ॥ १३ ॥

तूष्णीं=वेदमन्त्रेण विना । एताः=जातकर्माद्याः । स्त्रीणां=ब्राह्मण्यादितिसृणाम् । विवाहकर्मणि पत्युरधिकारस्तस्य च निषेकाद्या इत्यादितः सामान्यत एव मन्त्रप्राप्तौ--

वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः ।

इति(१)वचनाद्विवाहस्य स्त्रीसंस्कारकत्वेन तत्प्राधान्यमभिप्रेत्य तथा च मन्त्राणामपि सम्बन्धमाह-विवाहस्तु समन्त्रकः, इति । अत्र जातकर्मादौ साङ्गोपाङ्गे मन्त्रा(२)णां निषेधः । तथा च मनुः—

अमन्त्रिका तु कार्येयं स्त्रियामावृदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥

आवृत्=क्रिया । अशेषतः=सेतिकर्तव्यताका । एवं च विवाहेऽपि साङ्ग एव मन्त्रविधिरेकत्रेति न्यायादि(३)त्यर्थः ॥ १३ ॥

(१) वचनाद्विवाहस्य-इत्यादिः-स मन्त्रक इति-इत्यन्तो भागः ख. पुस्तके नास्ति ।
(२) मन्त्रामन्त्राणा-इति क. पुस्तके पाठः । (३) न्यायादिति-इति ख. पुस्तके पाठः ।

(मिता०) स्त्रीणां विशेषमाह—

तूष्णीमिति । एता जातकर्मादिकाः क्रियाः स्त्रीणां तूष्णीं विनैव मन्त्रैर्यथाकालं कार्याः । विवाहः पुनः समन्त्रकः कार्यः ॥ १३ ॥

(वी०मि०)उपनयनकालमाह—

गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम् ॥
राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥ १४ ॥

गर्भाधानसमयादष्टमे जन्मसमयादष्टमे वा वर्षे ब्राह्मणस्योपनायनम्। स्वार्थे णिच् । राज्ञां एकादश–इत्यत्र गुणभूतोऽपि गर्भशब्दोऽनुवर्तनीयः,आकाङ्क्षावलात्। तथा गोभिलः–'गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशेषु क्षत्रियं गर्भद्वादशेषु वैश्यम्' इति । विशां सैक–इत्यत्र एकादश इत्यनुषङ्गः, तेन द्वादश इत्यर्थः । एके=आचार्याः । यथाकुलं–कुलाचाराऽनुसारेण उपनयनमित्याहुः । एतेन कालान्तरमपि स्मृत्युक्तं तद(१)नुक्तं च सूचितम् । (२)तथा च गौतमः–'उपनयनं ब्राह्मणस्याऽष्टमे नवमे पञ्चमे वा काम्यम्' । अष्टम इति नित्यकालनिर्देशः । मनुः—

ब्रह्मचर्यस्य काम्यस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहाऽर्थिनोऽष्टमे ॥

उपनयेदित्युपक्रम्य— आपस्तम्बः–'अष्टमे ब्रह्मवर्चसकामं नवमे तेजस्कामं दशमे ऽन्नाद्यकाममेकादश इन्द्रियकामं द्वादशे पशुकामम्' । अत्र संस्का(३)रप्रकरणे यज्ञ इव मासादयस्त्रिंशदहोरात्राद्यात्मका एवेति प्राञ्चः । सौरास्ते । परन्तु यस्मिन्मासे जन्मदिनं सम्पूर्णमेवाऽऽदाय मासादिगणनमित्येके । अनयैव रीत्या मुख्याश्चान्द्रास्त इत्यपरे । परे पुनर्गौणचान्द्ररूपास्तिथिनिर्मिता मासिकादाविव प्रकृतेऽपि त इत्याहुः । कालविकल्पः फलविशेषाऽनुक्तौ पूर्वपूर्वसम्पत्तावुत्तरोत्तराश्रयणामित्येवं व्यवस्थितो बोध्यो न त्वैच्छिको, ऽष्टविधदोषादित्यन्यत्र व्युत्पादितम् । फलविशेषोक्तौ तु तदनुसारे व्यवस्था । सति सम्भवे स्वगृह्योक्त एव कल्प आदर्तव्य इति शिष्टाः ॥ १४ ॥

---

(१) तदनुक्तं-इति ख. पुस्तके नास्ति । (२) यथा-इति क. पुस्तके ।
(३) संस्कारेण-इति ख. पुस्तके पाठः ।

(मिता०) उपनयनकालमाह—

गर्भेति । गर्भाधानमा(१)दिं कृत्वा जननं वाऽष्टमे वर्षे ब्राह्मणस्योपनायनं उपनयनमेवोपनायनम् । स्वार्थे अण् वृत्ता(२)नुसारात् । छन्दोभङ्गात् । आर्षं वा दीर्घत्वम् । अत्रेच्छया विकल्पः । राज्ञामेकादशे । विशां वैश्यानां सैक एकादशे द्वादश इत्यर्थः । गर्भग्रहणं सर्वत्राऽनुवर्तते । समासे गुणभूतस्याऽपि गर्भशब्दस्य बुद्ध्या विभज्योभयत्राऽप्यनुवर्तनं कार्यम् ।

गर्भादेकादशे राज्ञो गर्भाद्धि द्वादशे विशः ।

इति स्मृत्यन्तरद(३)र्शनात् । यथा—अथ श(४)ब्दाऽनुशासनम् । केषां शब्दानामिति । लौकिकानां वैदिकानामिति । अत्राऽपि कार्यमित्यनुवर्तते कुलस्थित्या केचिदुपनयनमिच्छन्ति ॥ १४ ॥

(वी० मि०)उपनयनान्तसंस्कारकर्मणां पित्रादिकर्तव्यत्वं दर्शयन्नेव पित्रादेः कृत्यान्तरमाह—

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ॥
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥ १५ ॥

एवं ब्राह्मणादिकं शिष्यं शासनार्हं शुश्रूषादिगुणयुक्तमसूयादिदोषरहितं चेति यावत् । उपनीय=उपनयनाख्यकर्मणा संस्कृत्य । महाव्याहृतयो भूराद्यास्तिस्रः । सप्तेत्येके । तत्पूर्वकं यथा स्यात् । वेदं मन्त्रब्राह्मणरूपं पित्रादिरध्यापयेदित्यर्थः । महाव्याहृतयः प्रणवस्याऽप्युपलक्षिकाः ।

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यलं कृतं पूर्वं परस्ताच्च विशीर्यते ॥

इति मनुवचनात् । ब्रह्मणो वेदस्य शौचं वक्ष्यमाणम् । आचाराह्निकादीन् चकारादन्यानपि ब्रह्मचारिनियमान् । शौचग्रहणं 'गोवलीवर्द' न्यायात् ॥ १५ ॥

(मिता०) गुरुधर्मानाह—

उपनीयेति । स्वगृह्योक्तविधिनोपनीय गुरुः (१)शिष्यं महाव्याहृतिपूर्वकं वेदमध्यापयेत् । महाव्याहृतयश्च भूरादिसत्यान्ताः सप्त । पञ्च वा

(१) अवधिं कृत्वा जन्मनो ख. (२) प्रकरणानुसारात् क. (३) वचनात् ख.
(४) शब्दानामिति क. (५) शिष्यं गुरुः ख.

गौतमाऽभिप्रायेण । किं च शौचाचारांश्च वक्ष्यमाणलक्षणान् शिक्षयेत् । उपनीय शौचाचारांश्च शिक्षयेदित्यनेन प्रागुपनयनात्कामचारो दर्शितः । वर्णधर्मान्वर्जयित्वा स्त्रीणामप्येतत्समानं विवाहादर्वाक् । उपनयनस्थानीयत्वाद्विवाहस्य ॥ १५ ॥

(वी० मि०) शौचादीन् यथायथमनुक्रामन्नाह—

दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥
कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः ॥ १६ ॥

कर्णे स्थितं ब्रह्मसूत्रं यज्ञोपवीतं यस्य सः । कर्णोऽत्र दक्षिणः प्रथमोपस्थितत्वादाचाराऽनुसाराच्च ।

पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमाचरेत् ।

इति वचनादिति केचित् । इदं चैकवस्त्रतायाम् । 'यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा'इति सांख्यायनगृह्यात् । द्विवस्त्रपक्षे तु—

नियम्य वाचं संवीताङ्गोऽवगुण्ठितः ।

इति मनुवचनान्निवीतमेव कर्तव्यम् । संवीतन्निवीतं अङ्गे यस्य स तथा निवीतं कण्ठे सज्जितयज्ञसूत्रं 'निवीतं कण्ठसज्जने' इति कोशात् । तदपि पृष्ठदेशलक्षितं कार्यम् ।

कृत्वा यज्ञोपवीतं तु पृष्ठतः कण्ठलम्बितम् ।

इति यमवचनात् । दिवा=दिने । सन्ध्यासु=प्रातःसायंरूपासु 'सन्ध्ययोश्च यथा दिवा' इति वचनात् । बहुवचनस्य व्यक्तिबहुत्वादेवोपपत्तेः । सन्ध्यासु तिसृष्वपि दिवेत्यस्य तदतिरिक्तभागपरत्वादित्यपि व्याचक्षते-उदङ्मुखः=उत्तराभिमुखः । रात्रौ दक्षिणाभिमुखः कुर्यादुत्सृजेत् । चेदिति सन्ध्यास्वित्यत्राऽप्यान्वितम् । उपरोधविशेषेण—

नैत्रं पूर्वाण्ह एवेति सन्ध्यासु परिवर्जयेत् ।

इति चोक्तनिर्वाहाऽसम्भवाभिप्रायम् । अत्र पूर्वाण्ह इति ब्रह्ममुहूर्त्तपर्यन्तपरम् । मूत्रपुरीषे त्विति तु शब्दो भिन्नक्रमो दिवेत्यत्राऽन्वेति । दिवेत्यस्य प्रातर्मध्याह्नपरत्वेन सङ्गवादिषु उदङ्मुखत्वव्यवच्छेदार्थत्वात् । साम्प्रदायिकास्तु पुरीषे चेति पाठः । चकार उदङ्मुख इत्यनन्तरं योज्यः । तेन दिवा दिगन्तराभिमुखस्याऽत्रा-(१)ऽनुक्तस्य पुरीषाद्युत्सर्गे रीतिविशेषस्य च समुच्चयः । तथा देवलः—

(१) अत्र इति ख० पुस्तकेऽधिकः पाठः ।

सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः ।
विण्मूत्रे विसृजेन्नित्यं सन्ध्यासु परिवर्जयेत् ॥

यमः—

प्रत्यङ्मुखस्तु पूर्वाण्हे ऽपराण्हे प्राङ्मुखस्तथा ।
उदङ्मुखस्तु मध्यान्हे निशायां दक्षिणामुखः ॥

एवञ्च दिवा प्रातरादित्रिमुहूर्तात्मकसमयपञ्चकभेदेन व्यवस्थेति । 'ऐच्छिको विकल्पः' इति केचित् । एते च नियमाः सति सम्भवे, अन्यथा तु—

छायायामन्धकारे वा रात्रावहनि वा द्विजः ।
यथासुखमुखः कुर्यात्प्राणबाधभयेषु च ॥

इति यमवचनात् । नेति विष्णुपुराणे—

ततः कल्पं समुत्थाय कुर्यान्मैत्रं नरेश्वरः ।
नैर्ऋत्यामिषुविक्षेपमतीत्याऽभ्यधिकं भुवः ॥

'नैर्ऋत्यां शयनस्थानात्' आपस्तम्बः। दक्षिणां दिशं गत्वेति शेषः । अ(१)थ अस्तमिते वहिर्ग्रामादाराच्चावसथान्मूत्रपुरीषे वर्ज्जयेत् । आराद् दूरे-इत्युपाध्यायाः । समीप-इति मिश्राः । वायुपुराणे—

शुष्कैस्तृणैर्वा काष्ठैर्वा पत्रैर्वेणुदलेन च ।
मृण्मयैर्भाजनैर्वापि अन्तर्धाय वसुन्धराम् ॥

तृणैः काष्ठैश्च कुशपालाशादिभिन्नैः । 'तृणमयज्ञिकं काष्ठ'मित्यापस्तम्बात् । हारीतः —

न गच्छन्नाप्यवस्थितः स्थित ऊर्ध्वम् ।

आपस्तम्बः-'न सोपानत्को मूत्रपुरीषे कुर्यात्' । शङ्खलिखितौ-'नानन्तर्वासा न निर्वासाः' । अनन्तर्वासा अधरीयशून्यः । हारीतः-घ्राणास्यं वाससा वेष्टयित्वा मृद्धात्रींग्रीवामासज्य दक्षिणे वामपार्श्वे कमण्डलुमाधाय । मृद्धात्री मृत्तिकापात्री ।

यमः—

शिरः प्रावृत्य कुर्वीत शकृन्मूत्रविसर्जनम् ।

विष्णुपुराणे—

तिष्ठेन्नातिचिरं तत्र ।

तत्र मूत्रादिस्थाने । हारीतः-'लोष्ठेन प्रमृजीत शुष्ककाष्ठेन वा' ।

---

(१) तथा-इति ख० पुस्तके पाठः ।

गुदलिङ्गे इति शेषः । लोष्ठेनेति शुष्ककाष्ठाभावे । 'पर्णलोष्ठाश्मभिर्मूत्रपुरीषापकर्षणं कुर्या'दिति यमनिषेधात् । व्यासः—

नाऽश्ममूत्रफलाङ्गारैरुन्मृज्यान्नाऽस्थिबर्हिषा ।

हारीतः—'आर्द्रानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः स्रंसणं वर्जये'दिति । मूत्राद्युत्सर्गे देशविशेषनिषेधादयस्तु गृहस्थप्रकरणे दर्शयिष्यन्ते ॥ १६ ॥

(मिता०) शौचाचारानाह—

दिवेति । कर्णस्थं ब्रह्मसूत्रं यस्य स तथोक्तः । कर्णश्च दक्षिणः । 'पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत्' इति लिङ्गात् । असावहनि सन्ध्ययोश्च उदङ्मुखो मूत्रपुरीषे कुर्यात् । चकाराद्भस्मादिरहिते देशे । रात्रौ तु दक्षिणामुखः ॥ १६ ॥

(वी० मि०)

गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ॥
गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥ १७ ॥

गृहीतशिश्नो वामहस्तेन औचित्यादाचाराच्च । उ(१)त्थाय पुरीषाद्युत्सर्गस्थानात् । चकारात्स्थानान्तरे उपविश्य । केवलजलेन लिङ्गगुदे क्षालयित्वा । 'सुनिर्णिक्ते मृदं दद्या'दिति ब्रह्माण्डपुराणात् । सुनिर्णिक्ते केवलजलक्षालिते पाद्यादाविति निबन्धृभिस्तद्व्याख्यानात् । मृद्भिः श्रीवासक्तमृद्धात्रीतः शुचौ देशे स्थापिताभिरसिकताभिः(२) । अन्यथा तद्धारण(३) स्याऽदृष्टार्थतापत्तेः । तदसम्भवे त्वन्यतोऽप्यानीताभिरावश्यकत्वात् शुचिदेशीयाभिः सिकताभिः शकृत्करवल्मीकपांसुलकर्दममार्गोखरकुड्यलेपासम्पर्कधिनीभिः अन्तर्जलस्थशौचावशिष्टकीटादिप्राणियुक्तहलोत्खातव्यतिरिक्ताभिश्च स्मृत्यन्तराऽनुसारात् । केचित्तु—

वापीकूपतडागेषु नाहरेद्बाह्यमृत्तिकाः ।
अन्तर्जलगता ग्राह्याः परतो मणिबन्धनात् ॥

इति स्मृतिमञ्जूषालिखितवाक्यं प्रमाणयन्तो वाप्यादावन्तर्जलस्थां मृदमुपाददते । अभ्युद्धृतैः=पूर्वमेव करकादिपात्रे स्थापितैः । एत-

---

(१) उत्थाय-इत्यादिः मृदं दद्यात् इत्यन्तो भागः ख० पुस्तके नास्ति ।

(२) असिकताभिः— इत्यतः शकृत्करवल्मीकं पांसुलः कर्दममार्गः—इत्यधिकं ख० पुस्तके ।

(३) तद्धारणस्य—इति ख० पुस्तके ।

त्प्राण्यर्थमेवाऽभीत्युपसर्गस्याऽधिकस्योपादानम् । अत एव लिखितहारीतस्मृतौ–'दक्षिणपार्श्वे कमण्डलुधारणमुक्तं दृष्टार्थतया सङ्गच्छते' । सङ्गच्छते च—

उद्धृतोदकमादाय मृत्तिकां चैव वाग्यतः ।
उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः ॥

इति ब्रह्मपुराणे उद्धृतस्याऽऽदानविधानम् । एवं च जलाशयाद्धस्तमात्राहृतजलैः शौचं व्युदस्तम् । करकाद्यभावे तु हेमाद्रौ विशेष उक्तः–

बलिमात्रं परित्यज्य कुर्याच्छौचमनुद्धृतैः । इति ।

इदं पुनरत्राऽवधेयम् । मूत्रपुरीषोत्सर्गकालादौ कर्णोपवीतधारणादि न काम्यं,फलाऽश्रवणात् । विश्वजिन्न्यायस्याऽतिजघन्यत्वात् । नापि नित्यं मानाऽभावात् । नापि मूत्रपुरीषोत्सर्गाद्यङ्गमलौकिकानङ्गत्वात् । अन्यथा तक्षसूत्राधिकरणविरोधात् । किन्तु गृहस्थादाचारभङ्ग इन्द्रबाहुबन्धनादिवन्नैमित्तिकं न्यायतौल्यात् । अत एव न्यूनाधिकं न कर्तव्यमित्यग्रे ले(ख?)ख्यवचने अवहितातिक्रमे सामान्यत एव प्रायश्चित्तोपदेशः सङ्गच्छत इति कृतं विस्तरेणेति । गन्धलेपेति । गन्धलेपौ पुरीषादेः तत्क्षयकरं शौचं पाद्यादिक्षालनं कुर्यात् । अधो वामेन उद्र्ध्वं दक्षिणेन पाणिना ।

धर्मविद्दक्षिणं हस्तमधः शौचे न योजयेत् ।
तथैव वामहस्तेन नाभेरूद्र्ध्वं न शोधयेत् ॥
प्रकृतिस्थितिरेषा स्यात्कारणादुभयक्रिया ।

इति देवलात् । अतन्द्रितः=अनलसः । अनेन स्मृत्यन्तरोक्तसंख्यादिनियममभिप्रैति । तथा च मनुः–

एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ॥

एकत्र वामे । हारीतः–'दश मध्ये षडष्टतः' ।

पुनर्मनुः—

तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम् ।

मूत्रमात्रोत्सर्गे दक्षः—

एका लिङ्गे तु सव्ये त्रिरुभयोर्मृद्द्वयं स्मृतम् ।

ब्राह्मे—

पादयोर्द्वे गृहीत्वा च ।

अत्र पुरीषोत्सर्गे पादयोस्तिस्रः मूत्रमात्रोत्सर्गे त्वेकैका मृत्तिकेति मिश्राः । उभयत्राऽपि लेपादिशङ्कायां प्रथमः कल्पः । तदभावे द्वितीय इत्युपाध्यायः । बौधायनः-'मूत्रे द्वे द्वे(१)तसः ? समुत्सर्गे' । अत्र ब्रह्मचारिणः प्रायश्चित्तमप्यधिकम् । शङ्खः—

मृत्तिका तु समुद्दिष्टा त्रिपर्वी पूर्यते यया ।

त्रिपर्वी तर्जनीमध्यमाऽनामिकानां चरमपर्व(२)रूपा । 'अङ्गुष्ठपर्वमात्राऽपि मृत्तिका' इति छन्दोगान्हिकम् । 'आर्द्रामलकमितापि' इति मिश्राः । गुदमृत्तिकायां दक्षः—

अर्धप्रसृतिमात्रा तु मृत्तिका प्रथमा स्मृता ।
द्वितीया च तृतीया च तदर्धः परिकीर्तिता ॥

पुनः स एव—

लिङ्गेऽप्यत्र समाख्याता त्रिपर्वी पूर्यते यथा ।

अत्र लिङ्गे मृत्तिकाद्वयं गुदे पञ्च सप्त वा । वामकरे चतुर्विंशतिर्द्वात्रिंशद्वा हस्तद्वये चतुर्दश षोडश वा मृत्तिकाः स्मृत्यन्तरोक्ता लेपाद्यनुवृत्तिशङ्कायां यथाक्रमं बोध्याः । एवं—

पुनः सप्त (३)च मृत्तिकाः—इति बाह्ये । शेषे हस्तद्वये सप्त मृत्तिकाः । विधिरपि तत्पर एवेति संख्यामुक्त्वा मनुः—

एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणन्तु वनस्थानां यतीनान्तु चतुर्गुणम् ॥
यद्दिवा विहितं शौचं रात्रौ तस्याऽर्धमिष्यते ।
तदर्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि ॥

आतुरे=अत्यातुरभिन्ने । अध्वनि=अतिकान्तारे । अन्यत्राऽऽपस्तम्बः—

पथि पादस्तु विज्ञेय आर्त्तः कुर्याद्यथाबलम् ।

ननु संख्यादिनियमे—

यावता मन्यते शुद्धिं शौचं कुर्वीत तावता ।
प्रमाणं द्रव्यसंख्या वा न शिष्टैरुपदिश्यते ॥

इति देवलविरोध इति चेत्-मैवम्, तस्य स्त्रीशूद्रादिमात्र(४)विषय-

---

(१) भेतस इति ख० पुस्तके ।
(२) चरमपर्यन्तरूपा-इति ख० पुस्तके ।
(३) च-इति क० पुस्तकेऽधिकः पाठः ।
(४) विषयत्वादित्यादि-जलमात्रेत्यन्तो भागो नास्ति ख० पुस्तके ।

त्वात्तत्र संख्यादेरश्रवणात्। 'गन्धलेपक्षयाद्वाचम्य प्रयतो भवति' इति पैठीनसिरपि तत्पर एव। जलमात्रविषयं वा देवलवचनम्—

दातव्यमुदकं तावद्यावत्स्यान्मृत्तिकाक्षयः ।

इति दक्षात्। एवञ्च संख्यानियमोऽदृष्टार्थः । शुद्धिस्तु गन्धलेपक्षयादेवेति मतमनादर्तव्यं कल्पनाप्रसङ्गात्।

न्यूनाधिकं न कर्तव्यं शौचं शुद्धिमभीप्सता ।
प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते ॥

इति दक्षविरोधाच्च। अत्र न्यूनाधिकमिति संख्यामात्रे, तस्यैव प्रकृतत्वात्। अथ ऋष्यश्रृङ्गः—

यस्मिन् स्थाने कृतं शौचं वारिणा तत्तु शोधयेत् ।
न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत् ॥

अथ हारीतः—'गोमयेन मृदा कमण्डलुं परिमृज्य'। ब्रह्मपुराणे—द्विराचम्यत—इति ॥ १७ ॥

(मिता०) गृहीतशिश्न इति। किं च अनन्तरं शिश्नं गृहीत्वोत्थायोद्धृताभिरद्भिर्वक्ष्यमाणलक्षणाभिर्मृद्भिश्च गन्धलेपयोः क्षयकरं शौचं कुर्यात्। अतन्द्रितोऽनलसः। उद्धृताभिरद्भिरिति जलान्तः शौचनिषेधः। अत्र गन्धलेपक्षयकरमिति सर्वाश्रमिणां साधारणमिदं शौचम्। मृत्संख्यानियमस्त्वदृष्टार्थः ॥ १७ ॥

(वी० मि०) अथाऽऽचमनप्रकारमाह—

अन्तर्जानुः शुचौ देश उपविष्ट उदङ्मुखः ॥
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥ १८ ॥

शुचौ=अशौचापादकनिमित्तरहिते। देशे=भूमौ। अन्तर्जानुः=जानुद्वयमध्यस्थितबाहुद्वयं तादृग्दक्षिणबाहु वा यथा स्यात् तथोपविष्टः। तथा च हारीतः—'अन्तरूर्ध्वोर?रत्नी कृत्वा'। (१)गौतमश्च—'दक्षिणबाहुं जान्वन्तरं कृत्वा'। अत्र शक्त्यपेक्षो विकल्पः। द्वितीयपक्षो द्विराचम्यत एवेति मिश्राः। उदङ्मुखः=उत्तराभिमुखः, प्राङ्मुखः। वेत्यनुक्तस्याऽपि विकल्पार्थः। 'ईशानाभिमुखो भूत्वा' इति मरीचिवचनात्। उदङ्मुखत्वादिकमाचमनान्तम्(२)। पादप्रक्षालनेऽपि—

---

(१) गौतमश्चेति कृत्वेत्यन्तो भागो नास्ति क० पुस्तके ।

(२) आचमनाङ्गम्—इति ख० पुस्तके ।

प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः ।
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः ॥

इति देवलात् । स्थित्वेत्यूर्ध्वत्वदशायामेव । चरणक्षालनोक्तिर्जानुपर्यन्तक्षालनपक्षे—

इत्येवमङ्घ्री राजा तु प्रक्षाल्य चरणौ पृथक् ।
हस्तौ चाऽऽमणिवन्धाभ्यां पश्चादासीत संयतः ॥

इत्यग्रे तेनैवाऽभिधानात् । 'प्रक्षाल्य पादौ चोपविश्ये'ति गोभिलेऽप्येवम् । आजान्विति अध्वभ्रमणादिना जानुपर्यन्तशौचे । 'अन्यथा त्वाजङ्घाभ्यां पादा'विति हारीतोक्तमेव ग्राह्यम् । दैवत्य इत्यनेन च कृतवचनैकवाक्यत्वात् । पित्र्या इति रिक्तवैदिककर्माङ्गं नैमित्तिकञ्च सर्वमेवाऽऽचमनमभिप्रैति ।

प्रक्षाल्य पादौ पाणी च त्रिः पिबेदम्बु वीक्षितम् । इति ।

दाक्षिणे सामान्यादेवाऽऽचमने पादादिक्षालनविधानात् आकाङ्क्षातौल्यात् । प्रकृते तु पृथक् तदभिधानं मृद्ग्रहणकालीनपादक्षालनेनैव चरितार्थत्वात् । एवञ्च 'पृथक् पादासेचन'मित्यापस्तम्बवचनं केवलपादक्षालनविपयतया नेयम् । क्षालनन्तु पादयोर्दक्षिणोपक्रमेण 'सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति, ब्राह्मणश्चेद्दक्षिणं प्रथम'मिति पारस्करात् । छन्दोगानान्तु वैपरीत्यं गोभिलाऽनुसारात् ।

सव्ये पाणौ कुशान् कृत्वा कुर्यादाचमनक्रियाम् ।

इति (१) कात्यायनवचन—

सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् ।

इति मार्कण्डेयपुराणवचनाभ्यां कुशपवित्रधारणविधानम् । कर्माङ्गाचमनमात्र इति सामान्याचमनप्रकरणेऽत्र तन्नोक्तम् ।

क्रियां यः कुरुते मोहादनाचम्येह मानवः ।
भवन्ति निष्फलास्तस्य क्रियाः सर्वा न संशयः ॥

इति वायुपुराणवचनेनाऽऽचमनस्य सकलवैदिककर्माङ्गत्वावगमात् । सन्ध्यावन्दनाङ्गाचमनमात्रे तद्विधानमुपक्रमानुरोधात् इत्यपि केचिदित्यास्तां विस्तरः । ब्राह्मेण तीर्थेन=वक्ष्यमाणेन । द्विज इत्याचमनकर्तृमात्रोपलक्षणमाकाङ्क्षातौल्यात् । नित्यं सति सम्भवे तीर्थान्तरसौष्ठवेऽपि—

(१) एतदादिः—आचमनक्रियामितीत्यन्तो भागः क० पुस्तके नास्ति ।

ब्राह्मेण विप्रतीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ॥

इति मनुना सम्भवे तीर्थान्तरस्याऽपि विधानात् । उपस्पृशेत्=आचामेदिति ॥ १८ ॥

(मिता०) अन्तरिति । शुचौ अशुचिद्रव्यासंस्पृष्टे । देश (१)इत्युपादानादुपानच्छयनासनादिनिषेधः । उपविष्टो न स्थितो न शयानः प्रह्वो गच्छन्वा । उदङ्मुखः प्राङ्मुखो वेति दिगन्तरनिवृत्तिः । शुचौ देश इत्येतस्मात्पादप्रक्षालनप्राप्तिः । ब्राह्मेण तीर्थेन वक्ष्यमाणलक्षणेन । द्विजो न शूद्रादिः । नित्यं सर्वकालमाश्रमान्तरगतोऽपि । उपस्पृशेदाचामेत् । कथम् । अन्तर्जानुः जानुनोर्मध्ये हस्तौ कृत्वा दक्षिणेन हस्तेनेति ॥ १८ ॥

(वी० मि०) ब्राह्मेणेत्युक्तं, तत्किं ब्राह्मं किञ्च तस्य विशिष्य विधिना व्यवच्छेद्यं तीर्थान्तरमित्यपेक्षायां तीर्थान्याह—

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ॥
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ १९ ॥

देशिनीतर्जनीकनिष्ठादीनां मूलानि करस्याग्रं अनुक्रमात् यथासंख्यं प्रजापतितीर्थादीनि स्युः । तुशब्देनाऽङ्गुष्ठतर्जनीमूलयोर्व्यवच्छेदः । यदि तु चेति पाठः । तदा कनीनीमूलस्य समुच्चयः । (२)तथा च बौधायनः—'कनीनीमूलं देवमङ्गुल्यग्रमार्षम्' । वसिष्ठः—'ज्यङ्गुष्ठस्याऽग्रे मानुषं मध्य आग्नेयम्' । योगी—'मध्ये सौम्यं प्रतिष्ठितम्' । ब्राह्मे हस्तमध्ये ब्राह्मम् । शङ्खः—'कायं कनीनिकामूलम्' । एवञ्च 'कनिष्ठामूलस्य कायं प्राजापत्यं दैव'मिति । 'तर्जन्यङ्गुष्ठमध्यस्य पित्र्य'मिति । 'अङ्गुष्ठमूलस्य ब्राह्म'मिति । 'अङ्गुल्यग्रस्य दैवं आर्ष'मिति । 'हस्तमध्यस्य आग्नेयं सौम्यं ब्राह्म'मिति संज्ञा पर्यवस्यतीति ॥ १९ ॥

(मिता०) प्राजापत्यादितीर्थान्याह—

कनिष्ठेत्यादि । कनिष्ठायास्तर्जन्या अङ्गुष्ठस्य च मूलानि करस्याग्रं च प्रजापतिपितृब्रह्मदेवतीर्थानि यथाक्रमं वेदितव्यानि ॥ १९ ॥

(वी० मि०) आचमनस्वरूपं दर्शयन् तदुत्तराङ्गमप्याह श्लोकार्द्धेन—

---

(१) इत्युपानत् क० । (२) तथा च बौधायनः— इति ख० पुस्तके नास्ति ।

त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् ॥

अपः=मूत्रग्रहणानन्तरं संस्कृते कमण्डलौ स्थापिताः। 'गोमयेन मृदा वा कमण्डलुं परिमृज्य पूर्ववदुपस्पृशे'दिति हारीतात्। 'मूत्रपुरीषे कुर्वन् दक्षिणहस्ते गृण्हाति सव्येनाऽऽचमनीय'मिति कमण्डलवधिकारी । बौधायनवचनपर्यालोचनया तथैवाऽवगमात्। अन्यथाऽऽचमनकाले कमण्डलुधारणस्याऽदृष्टार्थापत्तेः। आचमनीयमाचमनविधिम्। एवञ्च 'भूमिगतास्वप्स्वाचम्य प्रयतो भवति यं वा प्रयत आचामे'दित्यापस्तम्बदर्शनात्। स्वहस्तावर्जितजलाचमनं प्रायश्चित्तहेतुरिति निरस्तम्। यं प्रयतोऽन्य आचामेत् आचामयेत् स च प्रयतो भव(१)तीत्यनुपज्यते। यद्वेति क्वचित्पाठः। 'न शूद्रात्कपाण्यावर्जिताभि'रिति शङ्खवचने। सव्येकपाणिपदे आचमनकर्तृभिन्नपरे शूद्रासाहचर्यात्।

बहिर्जानुरुपस्पृश्य एकहस्तार्पितैर्जलैः ।
सोपानत्कस्तथा तिष्ठन्नैव शुद्धिमवाप्नुयात् ॥

इति भविष्यवचनमप्येतदनुसारेणैव नेयमित्यन्यत्र विस्तरः। त्रिः=वारत्रयम्। एवं चाद्भक्षणत्रयं योगरूढिभ्यामाङ्पूर्वस्य च सेवार्थं उपपूर्वस्पृशेरिव। क्वचित्त्वेकदेशेऽपि तत्प्रयोगो लक्षणयेति ध्येयम्। प्राश्येति प्रशब्देन प्रकृताऽम्भक्षणे स्मृत्यन्तरोक्तरीतिसाचिव्यरूपप्रकर्षपरामर्शः। तथा च देवलः-

सोपानत्को जलस्थो वा मुक्तकेशो ऽपि वा द्विजः ।
उष्णीषी चाऽपि नाऽऽचामेद्वस्त्रेणोद्वेष्ट्य वा शिरः ॥

तथा—

न गच्छन्न शयानश्च न चलन्न परान्स्पृशेत् ।
न हसन्नैव संजल्पन्नात्मानं चैव वीक्षयन् ॥
केशान्नीवीमधःकायमस्पृशन् धरणीमपि ।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत्करम् ॥

आत्मानं हृदयं वीक्षयन्निति स्वार्थे णिच्। अधःकायो नाभ्यपेक्षया।

व्यासः-

शिरः प्रावृत्य कण्ठं चाऽमुक्तकच्छशिखोऽपि वा ।
अकृत्वा पादयोः शौचमाचान्तो ऽथ(१) शुचिर्भवेत् ॥

---

(१) आचान्तोऽथाऽशुचिर्भवेत् इति ख० पुस्तके ।

मुक्तकच्छशिखोऽपि वेति चरणस्थाने रथ्यापणगतोऽपि वेति ब्रह्माण्डपुराणे पठितम् । प्रचेताः–'नानन्तर्वासा नाश्नु कुर्वन्न चाऽमेध्ये' । अनन्तर्वासाः=अधोवस्त्रशून्यः ।

होमदेवार्चनाद्यासु क्रियास्वाचमने तथा(१) ।
नैकवस्त्रः प्रवर्त्तेत द्विजवाचनिके? ॥

गोभिलः—

नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम् ।

देवलः—

शिखां बध्वा वसित्वा तु निर्णिक्ते वाससी शुभे ।

भविष्ये —

विना यज्ञोपवीतेन मुक्तकच्छशिखो द्विजः ।
अप्रक्षालितपादस्तु आचान्तोऽथ शुचिर्भवेत् ॥

शाङ्खायनः—

दानमाचमनं होमं भोजनं देवतार्चनम् ।
प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम् ॥
आसनारूढपादस्तु जान्वोर्जङ्घयोस्तथा ।
कृता(२)वसक्थिको यस्तु प्रौढपादः स उच्यते ॥

कृतावसक्थिकः=कृतापाश्रयः 'बद्धपवाङ्ग' इत्येके । जलस्थं स्थलस्थं वाऽनेकोद्वाह्यं प्रक्षालितमेकोद्वाह्यमपि दारु नाऽऽसन, मपि तु वेदीस्थानीयमतस्तत्र पादारोहणं न दोष इत्यभिनववर्द्धमानोपाध्यायः । आपस्तम्बः–'तिष्ठन्नाचामेत् प्रह्वो वा' । हारीतः—

न बहिर्जानु न त्वरया नासनस्थो न चोत्थितः ।
न पादुकास्थो नाचित्तः शुचिः प्रयतमानसः ॥

तथा—

भुक्तासनस्थ आचामेन्नाऽन्यकाले कदाचन ।

गोभिलः—

जानुभ्यामूर्द्ध्वमाक्रम्य जले तिष्ठन्न दुष्यति ।
ताभ्यामधस्तथा तिष्ठन्नाचामेच्च विचक्षणः ॥

---

(१) एतदुत्तरं वासित्वा तु-इत्यन्तं ख० पुस्तके नास्ति ।
(२) एतत्पद्यार्द्धं क० पुस्तके नास्ति ।

पैठीनसिः-'अन्तरुदक आचान्तोऽन्तरेव शुध्यति वहिरुदक आचान्तो वहिरेव शुध्यति तस्मादन्तरेकं वहिरेकं पादं कृत्वाऽऽचामेत् सर्वत्र प्रयतो भवति'।

व्यासः—

अपः पाणिनखाग्रेण आचामेद्यस्तु वै द्विजः ।
सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥

व्यासः-'वाग्यतो हृदयस्पृशास्त्रिश्चतुर्वाऽप आचामेत्'। चतुर्वेति त्रिराचमनापरितोपपक्षे। भविष्ये—

घ(१)नाङ्गुलिकरं कृत्वा एकाग्रः सुमना द्विजः ।
समौ च चरणौ कृत्वा तथा वद्धशिखो नृपः ॥

नारसिंहे—

दक्षिणन्तु करं कृत्वा गोकर्णाकृतिवत्पुनः ।
त्रिः पिबेद्वीक्षितं तोयमास्यं द्विः परिमार्जयेत् ॥

गोभिलः—

रात्राववीक्षितेनाऽपि शुद्धिरुक्ता मनीषिभिः।

अवीक्षितेन तोयेन इति हलायुधनिवन्धे व्यासः—

शङ्कुहस्त उपस्पृशेत्। शङ्कुरूर्द्धीकृताङ्गुलिद्वयो हस्तो यस्य सः इति आचारमञ्जर्याम्।

ब्रह्मपुराणम्—

समस्ताङ्गुलिनोद्धृत्य पानीयं दक्षिणेन तु ।
त्यक्त्वाऽङ्गुष्ठं कनिष्ठाञ्च शेषेणाऽऽचमनं विदुः ॥

देवलः—

अथापः प्रथमात्तीर्थाद्दक्षिणात्त्रिः पिबेत्समम् ।
अशब्दमनवस्रावमस्पर्शहिर्जान्ववुद्बुदम् ॥

इत्यास्तां विस्तरः । द्विरुन्मृजेति वारद्वयं मार्जयित्वा, मुखमिति शेषः । 'त्रिरोष्ठौ परिमृजे'दित्यापस्तम्ववचनं तूच्छिष्टजलशेषाऽनुवृत्तिसम्भावनायाम् । मार्जनमङ्गुष्ठमूलेन ।

संवृत्याऽङ्गुष्ठमूले वा द्विः प्रमृज्यात्ततो मुखम् ।
संहृत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत् ॥ इति दक्षात्।

(१) घनाङ्गुलिकरं-इति क. पुस्तके।

मुखं संवृत्याऽनिर्लोमौष्ठं मुद्रयित्वा प्रमृज्यादित्यन्वयः ।

आचान्तः पुनराचामेत् वासो विपरिधाय च ॥
ओष्ठौ संस्पृश्य च तथा यत्र स्यात्तावलोमकौ ॥

इति वसिष्ठेन निर्लोमकौष्ठभागस्पर्शे द्विराचमनविधानात् । तिसृभिस्तर्जनीमध्यमानामिकाभिः संहत्य मिलित्वा स्थिताभिः । एवं संचरणपूर्वकमेवास्यं, उप=समीपे श्यामलोमकभागे स्पृशेदित्यर्थः । एवं द्विरिति केचित् । सकृदुपस्पृशेत् द्विरित्येके । 'दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेन्द्रियाण्युपस्पृशे' दित्यापस्तम्बात् । एवञ्चाऽऽस्यमार्जनोपस्पर्शनपाणिपादप्रोक्षणानि क्रमेण सिद्ध्यन्ति । मार्जनोपस्पर्शनयोर्मध्ये तु पाण्यादिप्रोक्षणं छन्दोगानां गोभिलसंवादात् । छन्दोगाह्निकादाचारस्य मार्जनानन्तरमुपस्पर्शनानन्तरञ्च करक्षालनमधिकमुक्तमिति । खानीति । खानि=छिद्राणि । 'शिरस्थानि खानि चोपस्पृशेच्छीर्षस्थानी'ति गौतमात् । घ्राणादीनीन्द्रियाणीति यावत् । तथा च गोभिलः—'इन्द्रियाण्यद्भिः संस्पृशेदाक्षिणी नासिके कर्णा'विति । अक्ष्युपक्रमः स्पर्शः छन्दोगाना, मन्येषां ब्राह्मणोपक्रम एव दक्षाद्यनुसारात् । समुपस्पृशेदिति सम्यगुपस्पृशेदित्यर्थः । तेन प्रतिच्छिद्रमद्भिः स्पर्शनं लभ्यते । खानीति चोपलक्षणम् । तथा च दक्षः—

अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् ।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः ॥
नाभिं कनिष्ठाङ्गुष्ठाभ्यां हृदयन्तु तलेन वै ।
सर्वाभिस्तु शिरः पश्च द्वाहू चाग्रेण संस्पृशेत् ॥

पश्चादास्यस्पर्शादेः । अत्राऽङ्गुष्ठेन प्रदेशिन्येत्युक्तेः ।

अङ्गुष्ठमध्यमायोगात् स्पृशेन्नासापुटद्वयम् ।

इति शङ्खोक्तपक्षान्तरम् । पुनःपुनरिति वीप्सा घ्राणचक्षुःश्रोत्राणां प्रत्येकं पुटद्वये स्पर्शपरान्वयितावच्छेदकसामानाधिकरण्ये समभिव्याहृतक्रियासमभिव्यवहार एव । पुनः पुनरन्नं भुङ्क्त इत्यादिप्रयोगदर्शनेन पुनःशब्दस्य व्युत्पत्तिस्थैर्यात् । अत एव शङ्खवाक्ये-'स्पृशेन्नासापुटद्वयं नेत्रद्वयं श्रवणे' इत्युक्तम् । 'चक्षुषी नासिके श्रोत्रे सकृदुपस्पृशेत् द्विरेके' इत्यापस्तम्बदर्शनात् । एकैकत्र नासापुटादौ द्विर्द्विः स्पर्शनमित्यपि पक्ष इत्याहुः ।

नाभिस्पर्शानन्तरन्तु हस्तप्रक्षालनन्ततः ।

'स्पृशेन्नाभिदेशं पुनरपः संस्पृशे'दिति व्यासात् । अथ पैठीनसिः—

स्पृष्ट्वा प्राणान् यथासङ्ख्यं पादौ प्रोक्ष्य ततः शुचिः ।

सव्ये च पाणौ शेषा अपो (१)नयेत् । प्राणान् इन्द्रियादीन् निनयेत् दद्यात् । इन्द्रियस्पर्शानन्तरं भविष्ये—

यद्भूमावुदकं वीर ! समुत्सृजति मानवः ।
वासुकिप्रमुखान्नागांस्तेन प्रीणाति भारत ! ॥

शौचानन्तरं हारीतः—'गोमयेन मृदा वा कमण्डलुं परिमृज्य पूर्ववदुपस्पृश्याऽऽदित्यं सोममग्निं वा वीक्षेत' । अत्र दिवाऽऽदित्यं, रात्रौ सोमं, तयोरभावेऽग्निमिति व्यवस्था । ब्राह्मे—

पादयोर्द्वे गृहीत्वा तु सुप्रक्षालितपाणिना ।
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम् ॥

शङ्खलिखितौ—'आचम्येशानं मनसा ध्यायेत्' । अत्राऽऽदित्यादिदर्शनं विष्ण्वादिस्मरणं च शौचानन्तराचमन एव तत्सन्दंशात् । द्वित्वमपि तत्रैव नियतम् । अन्यत्र तु यथा तत्तद्विधानमिति स्मर्तव्यम् । व्यासः—'शौचं कृत्वा मूत्रोच्चारं न पश्येत् दृष्ट्वाऽऽदित्यमग्निं सोमं वा पश्येत्' । अत्र(२)वसिष्ठेन गोब्राह्मणस्पर्शनमधिकमुक्तम् । द्विराचमने तु पादक्षालनं सकृदेव दृष्टैक्यात् । आस्यमार्जनादि पुनरावर्तते दृष्टिभेदात् । आस्यस्पर्शादिकमप्यावर्तते अदृष्टार्थत्वात् । भोजनोपक्रमाचमने तु सकृदेवोष्ठस्पर्शः । भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेत् । 'द्विः परिमृजेत्सकृदुपस्पृशे'दित्यापस्तम्बात् । द्विजातीनामपि द्वितीयाचमने 'ओष्ठस्पर्शमात्रं प्रत्युपस्पृश्याऽन्ततः शुचिर्भवती'ति गोभिलादिति श्रीदत्ताह्निकम् । आचमनविध्यनन्तरं देवलः—

रेतोमूत्रशकृन्मोक्षे भोजनेऽध्वपरिश्रमे ।
शौचमेवंविधं प्रोक्तमीषच्चाऽन्यत्र वर्तते ॥

एवंविधं यथोक्तसकलाङ्गसम्पन्नम् । अन्यत्र ईषत् आचमनमात्रमपि(३) इन्द्रियस्पर्शादिरहितं शुद्धये भवतीत्यर्थः । अध्वपरिश्रम इति गमनमात्रव्यवच्छेदः ॥

---

(१) नियोजयेत्-इति ख. पुस्तके ।
(२) अथ-इति क. पुस्तके ।
(३) इति-इति क. पुस्तके ।

(वी० मि०) अपो विशिंषन् व्यवस्थामाह सार्द्धेन—

अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ॥ २० ॥
हृत्कण्ठतालुगाभिस्तु यथासङ्ख्यं द्विजातयः ॥
शुद्ध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥ २१ ॥

अद्भिस्त्विति तुशब्देन भिन्नक्रमे स्मृत्यन्तरनिषिद्धजलव्यवच्छेदः। तथा च बौधायनः—'पादप्रक्षालनोच्छेषेण नाचामेत्' । भूमौ(१)स्नापयित्वाचामेत् । स्नापयित्वा=स्नाव्य । आपस्तम्बः—'नाभ्युदकशेषेण वृथा कर्माणि कुर्वीताऽऽचामेद्वा यानि क्षुभेन तथा न वर्षधाराभ्याचामेत् तथा न प्रदरोदकेन तप्ताभिश्चाऽकरणात्' । प्रदरो विदीर्णभूमिभागः। वसिष्ठः-'प्रदरादपि यागोस्तर्पणाय स्युः'तप्ताभिरित्यग्नितप्तपरम्। अश्रिताभिरिति शङ्खदर्शनादिति नारायणः । हलायुधेऽप्याह—'नाग्नितप्ताभि'-रिति । कारणाद्रोगादेः ।

उदकेनाऽऽतुराणान्तु तथोष्णेनोष्णपायिनाम् । इति ।

प्रकृतिस्थाभिर्द्रव्यान्तरासंस्पृष्टाभिरिति केचित् । साहजिकरूपादिमतीभि'रिति ज्यायः ।

न वर्णरसदुष्टाभिर्याश्च स्युरशुभागमाः ।

इति वसिष्ठोक्तेः । अशुभागमाः=अशुचिदेशागताः । बुद्बुदाः फेना इति प्रसिद्धाः । द्विजातयो ब्राह्मणक्षत्रियवैश्या यथासंख्यमन्तरवच्छेदेन हृत्कण्ठतालुगामिनीभिः शुध्यन्ति । स्त्रीशूद्रौ अन्ततः=ओष्ठप्रान्तेन सकृत्स्पृष्टाभिः शुद्ध्यतः। 'उत्तरोत्तरमपकर्षा'दिति पारिजातः । हलायुधनिबन्धे तु सुहृद् यगाभिः ब्राह्मणः शुचिः,कण्ठगाभिः क्षत्रियः,तालुगाभिः वैश्यः,स्त्री शूद्रश्च ओष्ठप्रान्तगाभिरिति शङ्खवचनमेवाऽत्र लिखितम् । अन्ततोऽन्तरवयवेन । एवं चापां भक्षणमेव विवक्षितम् । आचामेदित्युपक्रम्य—

शारीरं शौचमिच्छन् हि शूद्रश्चैव सकृत्सकृत् ।

इति मनुना शूद्रे चशब्दसमुच्चितायां स्त्रियां च सकृदम्भक्षस्य स्फुटं विधानादिति कल्पतरुप्रभृतयः । अन्ततः=अन्तेन, सार्वविभक्तिकस्तसिः तालुनेत्यर्थः । सकृदिति तु वैश्याद्विशेष इति मिताक्षरा । अत्र

(१) एतदादि-वर्षधाराभ्याचामेत इत्यन्तं ख. पुस्तके नास्ति ।

वर्द्धमानादयो मिताक्षरां, मिश्राः कल्पतरुं, श्रीदत्तोपाध्यायाः पारिजातकमनुसरन्ति ।

स्त्री शूद्रो वाऽथ नित्याम्भःक्षालनाच्च करौष्ठयोः ।

इति ब्रह्मपुराणाच्चरमो ज्यायान् । शारीरमित्यादिमनौ स्पृशेदित्यध्याहारः । 'कृष्णलं श्रपये'दित्यादाविव व्यापारमात्रं वा धात्वर्थः । यद्वा शारीरशौचार्थिनोऽम्भक्षणमेव विधीयत इति तत्त्वम् । यत्तु आचमनार्थे पाणिपादप्रक्षालनमात्रमेवेति शूद्राधिकारे गौतमवचनम्, तदाचमनार्हजलाभाव इत्याचाराऽध्यायव्याख्यानन्तु सर्वसंमतमिति । शूद्रश्चेति चकारादनुपनीतोऽपीति मिताक्षरा । द्विजातिपदं द्वितीयजन्मयोग्यतामात्रपुरस्कारेण त्रैवर्णिकसामान्यपरम् । अन्यथा द्विज इत्यादिशब्दोल्लेखेन विहितमशौचादिकमनुपनीतस्य न स्यात् । स्त्री शूद्रश्चेति चकारयोरन्यसमुच्चयार्थेनैव द्राक् प्रतीतेरनुक्तसमुच्चये मानाभावात् । एवं चाऽनुपनीतानामपि त्रैवर्णिकानामुपनीतवदाचमनकल्प इति त्वन्ये निबन्धारः ॥ २० ॥ २१ ॥

(मिता०) आचमनप्रकारः—

त्रिरिति । वारत्रयमपः पीत्वा मुखमङ्गुष्ठमूलेन द्विरुन्मृज्य खानि छिद्राणि ऊर्ध्वकायगतानि प्राणादीनि अद्भिरुपस्पृशेत् । अद्भिर्द्रव्यान्तरासंसृ(१)ष्टाभिः । पुनर(२)द्भिरित्यब्ग्रहणं प्रतिच्छिद्रमुदकस्पर्शनार्थम् । स्मृत्यन्तरात्-'अङ्गुष्ठेन प्रदेशिन्या घ्राणं चैव मुखं स्पृशेत् । अङ्गुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः ॥ कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं तु तलेन वै । सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्' ॥ इति । पुनस्ता एव विशिनष्टि । प्रकृतिस्थाभिः गन्धरूपरसस्पर्शान्तरमप्राप्ताभिः । फेनबुद्बुदरहिताभिः । तुशब्दाद्वर्षधारागतानां शूद्राद्यावर्जितानां च निषेधः ॥ २० ॥

(मिता.) हृत्कण्ठेत्यादि । हृत्कण्ठतालुगाभिरद्भिर्यथाक्रमेण द्विजातयः शुध्यन्ति । स्त्री च शूद्रश्च अन्ततः अन्त(३)र्गतेन तालुना स्पृष्टाभिरपि । सकृदिति वैश्याद्विशेषः । चशब्दादनुपनीतोऽपि ॥२१॥

स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयमः ॥
सूर्यस्य चाऽप्युपस्थानं गायत्र्याः प्रत्यहं जपः ॥ २२ ॥

---

(१) संसृष्टाभिः क. ग. ।   (२) पुनरब्ग्रहणं क. ।   (३) अन्तेन ख. ।

(वी० मि०) स्नानमिति। स्नानेतिकर्तव्यतायाः संहितान्तरे याज्ञवल्क्येनैव प्रपञ्चितत्वान्नेह तदभिधानम्। तथा च योगी—

योऽसौ विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः।
असामर्थ्यान्न कुर्याच्चेत्तत्राऽयं विधिरुच्यते॥
स्नानमन्तर्ज्जलं चैव मार्जनाचमने तथा।
जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनम्॥
अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः।
स्नानाचरणमित्येतत्समुद्दिष्टं महात्मभिः॥

अयमर्थः—विस्तरतः स्नानकरणासामर्थ्येऽघमर्षणसूक्तेन त्रिरावृत्तेन क्रमेण जलाभिमन्त्रेण तीर्थपरिकल्पनाचमनमार्जनान्तर्जलजपस्नानानि कुर्यात्। पूर्वप्रतिपन्नक्रमवत्तीर्थपरिकल्पनाद्यनुवादेन मन्त्रमात्रविधानादत्र विपरीतेऽपि शाब्दक्रमे पूर्वस्नानकल्पस्यैव क्रमो ग्राह्य इति। अत्र विस्तरस्नानकल्पेऽसामर्थ्ये संक्षिप्ततत्कल्पोपादाने बीजमुपदर्शयताऽत्रापि कल्पेऽसमर्थस्येतोऽपि संक्षिप्तं कल्पान्तरमुपादेयत्वेनाऽभिसंहितम्। तद्यथा पद्मपुराणे—

अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत्—इत्यादिना सर्वपापं प्रमोचय—इत्यन्तेन दर्शितम्। तदनुसारी चाऽयं क्रमः। नाभिमात्रं जलं प्रविश्य ॐ नमो नारायणाय इति मूलमन्त्रेण चतुर्हस्तं चतुरस्रं जलं हस्तेनाऽवच्छिद्य(१)तीर्थे तीर्थत्वेन कल्पयित्वा 'विष्णोः पादे'त्यादिना 'शान्तिप्रदायिनी'त्यन्तेन वा 'रात्रिपथगामिनी'त्यन्तेन वा तत्र गङ्गामावाह्य मूलमन्त्रेण सप्तधा पठितेन, सप्तकृत्वः पञ्चकृत्वश्चतुस्त्रिर्वा करसम्पुटेन जलं मूर्ध्नि क्षिप्त्वा 'ॐ अश्वक्रान्ते रथक्रान्ते' इत्यादिना 'सर्वपापं प्रमोचय' इत्यन्तेन मृदमभिमन्त्र्य तया गात्राण्यालभ्य नद्यादौ प्रवाहादिमुखोऽन्यत्र सूर्याभिमुखस्त्रिर्निमज्जेदिति। अयञ्च स्नानविधिः सर्वशाखिसर्ववर्णसाधारणः, सङ्कोचे मानाभावात्। पुराणश्रवणे सर्वाधिकारश्रवणाच्च। अनधीतवेदं प्रति चाऽयमेव प्रशस्तो वेदमन्त्रशून्यत्वात्। न च—

ब्रह्मक्षत्रविशाञ्चैव मन्त्रवत्स्नानमिष्यते।
तूष्णीमेव तु शूद्रस्य सनमस्कारकं स्मृतम्॥

(१) तीर्थे-इति ख. पुस्तके नास्ति।

इति नारसिंहे शूद्रस्य सामान्यत एव मन्त्रनिषेधात्कथमेवमिति वाच्यम्। 'वेदमन्त्रवर्जं शूद्रस्य' इति स्मृत्यन्तरैकफलकत्वेनाऽत्र वैदिकमन्त्रमात्रव्युदासात्। तूष्णीं वेदमन्त्रवर्जं,सनमस्कारकं जलनमस्कारसहितं वेदमन्त्रस्थाने नमःशब्दमात्रयुक्तमित्येके। एवं मत्स्यपुराणाद्युक्तोऽपि सर्वसाधारण एवेति। नरसिंहपुराणीयस्तु कुशमृत्तिलान् शुचौ देशे स्थापयित्वाऽभ्युत्य (१)स्वतो येन पूर्ववद्देहं प्रक्षाल्य स्नानशाटीं संशोध्य द्विराचम्य शनैर्जलं प्रविश्य वरुणमप्पतिं नत्वा हरिं स्मरन् पूर्ववदाप्लवेत्। ततस्तीरं समासाद्य आचम्य 'ॐ उपास्मै गायता'इत्यादि 'शं राजन्नोषधीभ्यः'इत्यन्तेन (२)त्यृचेन कुशाग्रस्थतोयेनाऽऽत्मानं प्रोक्ष्य 'इदं विष्णु'रिति त्यृचेन मृदा गात्राण्यालभ्य नारायणं देवं स्मरन् जलं प्रविश्याऽघमर्षणसूक्तस्य ऋष्यादिकं स्मृत्वा जले निमग्नः त्रिरघमर्षणं जपेदिति। सर्वत्र वे(३)धस्नानकल्पे पूर्वं स्नानाय नेया प्रायत्ये मलापकर्षणं स्नानम्।

तूष्णीमेवाऽवगाहेत यदा स्यादशुचिर्नरः।
आचम्य च ततः पश्चात्स्नानं विधिवदाचरेत्॥

इति हारीतादित्यास्तां विस्तरः। स्नानाऽशक्तौ सन्ध्यादिकर्मानुकूलशौचार्थमाह-अब्दैवतैर्मन्त्रैर्मार्जनमिति। अब्दैवतैरापोहिष्ठेत्यादित्रिभिः। इदञ्च सावित्र्यादेरप्युपलक्षणम्। तथा च योगी—

त्रिरावर्त्य तु सावित्रीं प्रणवं व्याहृतीस्तथा।
मार्जनं च ततः कृत्वा आपोहिष्ठेति मार्जयेत्॥
अधोमधः प्रतिक्षिप्य उर्ध्वं सार्द्धां समुत्क्षिपेत्।
अधोभागविसृष्टाया असुरा यान्ति संक्षयम्॥
सर्वतीर्थाऽभिषेकश्च ऊर्ध्वं संमार्जनाद्भवेत्।
अघमर्षणसूक्तेन मार्जनं कारयेत्ततः॥
शं न आपश्च द्रुपदां कामतः सम्प्रयोजयेत्।
एवं संमार्जनं कृत्वा बाह्यशुद्ध्यर्थकारणम्॥
अथाऽऽभ्यन्तरशुद्ध्यर्थं प्राणायामान् समभ्यसेत्।

प्रणवव्याहृतित्रयसहितगायत्र्या त्रिरावृत्तया एकं मार्जनम् 'आपो-

(१) तुभ्युपदस्य-इति क. पुस्तके।
(२) इत्यन्तेनाऽप्यृचेन-इति क. पुस्तके। (३) वैध-इति ख. पुस्तके।

हिष्ठे'त्यादित्र्यृचस्य प्रथमार्धेन दर्भैर्जलमधः क्षिप्त्वाऽपरार्द्धेन द्वितीयम्। अघमर्षणेन सूक्तेन तृतीयम्। 'शन्न आपो धन्वान्याः शन्नो भवन्त्वनूप्याः। शन्नः समुद्रिया आपः शन्नो भवन्तु कूप्याः' इति मन्त्रेण चतुर्थं, द्रुपदया पञ्चममिति। चतुर्थपञ्चमे चाऽत्रापि कल्पे काम्ये एव न। 'आपस्तु द्रुपदां कामतः' इत्यभिधानात्। यद्यपि स्नानाशक्तौ तदनुकल्पो मार्जनम्।

कालदोषादसामर्थ्यान्न शक्नोति यदाह्यसौ।
तदा ज्ञात्वा ऋषिभ्यस्तु मन्त्रैर्दृष्टन्तु मार्जनम्॥
शन्न आपस्तु द्रुपदा आपोहिष्ठाऽघमर्षणम्।
एभिश्चतुर्भिर्मन्त्रैस्तु मन्त्रस्नानमुदाहृतम्॥

इति योगिनैव 'शन्न आप' इत्यादिमन्त्रचतुष्केनोक्तम्। तथापि पक्षान्तरमेतत्। यद्वाऽधिकफलार्थमिदं मार्जनं कल्पान्तरं वा। स्नानानुकल्पमार्जनन्तु प्रकृतं याज्ञवल्क्योक्तम्। आपोहिष्ठेत्यादित्र्यृचमात्रकरणकमेव। 'आपोहिष्ठे'ति तु ब्राह्ममिति हारीते तस्याऽपि विधानात्। परमार्थतस्तु 'अब्दैवतैर्मन्त्रैर्मार्जन'मिति सन्ध्यावन्दनान्तर्गतं 'आपोहिष्ठे'त्यादित्र्यृचमात्रमन्त्रकं प्राणायामोत्तरकृत्यमेवोक्तं क्रमे(१)तात्पर्याभावात्। 'त्रिराचम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्द्ध्वं क्षिप्त्वा' इति कात्यायनसूत्र इव सन्ध्याप्रयोगो लक्षणमात्रत्वात्। अत एवाऽनुपदं प्राणानायम्य सम्प्रोक्ष्येत्येव वक्ष्यति। न चैवं पौनरुक्त्यमाशङ्कनीयमुक्तानुवादेन सायंसन्ध्यायां विशेषमात्रपरत्वात्। अन्यथा प्राणायामे तस्य वज्रलेपत्वादिति निपुणमालोकनीयमिति। प्राणसंयम इति प्राणायाम इत्यर्थः। एतत्प्रकारं वक्ष्यति। सूर्यस्योपस्थान'मुद्वय'मित्यादिमन्त्रैः। गायत्र्याः 'तत्सवितु'रित्यादिकायाः ऋचो जपः। एते प्रत्यहं क्रियेरन्। अनेन नित्यत्वमुक्तम्। तथा (२)च कात्यायनः—

यथाऽहनि तथा प्रातर्नित्यं स्नायादनातुरः।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चोत्तरमन्त्रवित्॥

गेह इत्युद्धृतोदकोपलक्षणं नद्याद्यभावे विधानात्। यदि तु स्नानमब्दैवतैरित्यादिना मध्याह्नस्नानादिकमेव विवक्षितम्। प्रत्यहमिति श्रवणात्। अत एव प्राणानायम्येत्यादिना सायंसन्ध्यां प्रातरेवमित्या·

(१) क्रमेण- इति ख. पुस्तके।

(२) च-इति ए. पुस्तके नास्ति।

दिना च प्रातःसन्ध्यां पृथक् पृथगेव वक्ष्यति, तदा स्पष्टमेव प्रकृतस्नानस्य नित्यत्वम्। अथातो नित्यस्नानमिति 'सवस्त्रोऽहरहराप्लुत्ये'त्यादिनानास्मृतिभ्यः। परं त्वस्मिन् पक्षे प्रातःस्नानानभिधानेन न्यूनत्वम्। न च पक्षान्तरेऽपि शङ्कनीयं मध्याह्नस्नानस्य गृहस्थप्रकरणेऽभिधानात् प्रत्यहमिति (१)त्वहोरात्रमिति परत्वेनाऽप्युपपद्यते बहुशः प्रयोगदर्शनादिति। सन्ध्यावन्दनं तु दिवातनं सामान्यमेव चाऽत्रोक्तमिति पर(२)मं च शिष्यते। तत्तु गृहस्थप्रकरणीयकृतशौचविधिरिति विधिपदेन प्रातःस्नानोक्तेः। परिहरणीयमिति सन्ध्यावन्दनमपि नित्यम्। तथा च विष्णुपुराणे—

नित्यकालमुपस्थानं सन्ध्ययोः पार्थिवेष्यते।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥

योगी—

सन्ध्यात्रयन्तु कर्त्तव्यं द्विजेनाऽऽत्मविदा सदा।
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥

दक्षः—

यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत्।
आपत्स्यध्वस्वशक्तौ च सन्ध्यां कुर्वीत मानसीम्॥

इति स्मृतिमञ्जूषायां लिखितम्। संवदति चैतत् 'मनसा चैनं सम्यगाचारमनुपालये'दिति गौतमोक्तेन। सन्ध्ययोरिति विष्णुपुराणं ब्रह्मचारिपरम्। अथ ब्रह्मचारिणो गुरुकुलवासः सन्ध्याद्वयोपासनमिति विष्णुवचनैकमूलकत्वात्। सन्ध्यात्रयन्तु कर्तव्यमिति योगिवचनं भिक्षुपरमात्मविदेति श्रवणादिति केचित्। तन्न—

एतत्सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्।
यस्य नाऽस्त्यादरस्तत्र स न ब्राह्मण उच्यते॥

इति आदिवचनद्वारस्य तत्त्वं सिद्धम्। वयोमाना(?)भावादात्मविदेत्यस्याऽहं ब्रह्मण इति ज्ञानवतेत्यर्थात् विष्णुवचनस्य प्रायोवादत्वात्परिसंख्यायां गौरवात् गृहस्थस्याऽप्यग्रे सन्ध्योपासनाभिधानात्साधारणविधौ लाघवाच्च। अत्र 'ऋतं च सत्यं च' इत्यादिनाऽऽचमनमारभ्य गायत्रीजपान्ते कर्मकलापे सन्ध्यापदं प्रवर्त्तते, पवित्रयागमार-

(१) त्वहोरात्रमिति-इति क. पुस्तके नास्ति। (२) परमेव-इति ख. पुस्तके पाठः।

भ्य क्षुद्रश्रुतिपर्यन्त इष्टसमुदायेऽश्वमेधपदवदिति तत्कर्त्तव्यता विधीयते।

सन्ध्यामुपासते ये तु सततं शंसितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥

यमस्मृत्यादौ तु देवताविशेषपरम्।

ब्रह्मणोपासिता सन्ध्या विष्णुना शङ्करेण च।
कस्तां नोपासयेद्देवीं सिद्धिकामो द्विजोत्तमः॥

इति योगिना देवित्वेन कीर्तनात्।

यावन्तोऽस्यां विकर्मस्थाः पृथिव्यां वालिशा द्विजाः।
तेषान्तु पावनार्थाय सन्ध्या सृष्टा स्वयम्भुवा॥
सन्ध्या उपासिता येन विष्णुस्तेन उपासितः।

इति विष्णुतौल्यप्रदर्शनाच्च। विकर्मस्थाः विहिताऽकर्तारः शास्त्रनिषिद्धकर्त्तारश्च, वालिशा ज्ञानशून्याः तस्या उपासनमाराधनमुक्तकर्मकलापेनेति विवेक्तव्यम्। ब्रह्मलोकगमनादिफलश्रवणादत्राऽपि सम्वलिताधिकार इत्यन्यत्र विस्तरः। सूर्यस्य चाऽप्युपस्थानमिति चाऽपिकाराभ्यामनुक्तस्य विशेषान्तरस्य सन्ध्यावन्दनेतिकर्तव्यतान्तरस्य च समुच्चयः। तच्चेह कृत्स्नामपि सङ्क्षेपतः प्रदर्श्यते। तथा च शङ्खलिखितौ-'स व्रती वहिः सन्ध्यामुपासीत'। स व्रती ब्रह्मचारी वहिर्ग्रामात्।

नैनं ग्रामेऽभिनिम्लोचेत् सूर्यो नाभ्युदयात् क चित्।

इति मनुवचनात्। एवं ब्रह्मचारिणं निम्लोचेत् अस्तं यायात्।

योगी—

स्नात्वैवं वाससी धौते अक्लिष्टे परिधाय च।
प्रक्षाल्योरू मृदाऽद्भिश्च हस्तौ प्रक्षालयेत्तथा॥

अक्लिष्टे दग्धत्वाऽदिदोषरहिते।

विष्णुः-

नाऽप्रक्षालितं पूर्वधृतं वासो वा विभृयात्।

पराशरः—

स्नात्वा निरस्य वासोऽन्यज्जङ्घे प्रक्षालयेन्मृदा।
अपवित्रीकृते ते तु कौपीनं श्च्योतदम्भसा॥

कौपीनं लिङ्गम् । तथा—

अभावे धौतवस्त्रस्य शानक्षौमाविकानि च ।
कुतपो योगपट्टश्च द्विवासा येन वा भवेत् ॥

कात्यायनः—

'तृतीयमुपवीतं वा(१) उत्तरीयं कुर्या'दिति प्रकरणात् । तथा मृदोरू करौ प्रक्षाल्याऽऽचम्य इदानीं तिलककरणमाचारात् । तत्र भारते—

गङ्गातीरसमुद्भूतां मृदं मूर्द्धा बिभर्ति यः ।
बिभर्ति रूपं सोऽर्कस्य तमोनाशाय केवलम् ॥

वर्द्धमानादयस्तु—

कर्मादौ तिलकं कुर्याद्रूपं तद्वैष्णवं परम् ।
यज्ञो दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥
भस्मीभवति तत्सर्वमूर्द्ध्वपुण्ड्रविवर्जितम् ।

इति ब्रह्माण्डपुराणवचनमेव तिलके प्रमाणयन्ति ।

वामनपद्धतौ विशेषः—

ललाटे वंशपत्राभं दीर्घं विप्रस्य शस्यते ।
मीनाकारं ततो न्यूनं क्षत्रियस्य प्रशस्यते ॥
ततो न्यूनं तु वैश्यस्य शूद्रस्याऽप्यर्धचन्द्रकम् ।
तिर्यक् तथाऽऽयतं पुण्ड्रं नित्यं कर्माङ्गमिष्यते ॥

तथा उशनाः—

अभावे तूदकेनाऽपि (२)पौण्ड्रीं दैवतमर्चयेत् ।

'गङ्गातीरसमुद्भूता' मित्युपक्रम्य—

मूर्द्ध्नि कण्ठे ललाटे च बाहुभ्यां हृदये तथा ।
नाभौ पृष्ठे प्रदातव्यं पार्श्वतश्च द्वयं द्वयम् ॥

इति पठन्ति । सन्ध्योपक्रमे व्यासः—

स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः ।
पुनराचम्य हृदयं नाभिं स्कन्धौ च संस्पृशेत् ॥

यदि तस्मिन्काले मुक्तशिखः स्यात्तदाऽनेन मन्त्रेण शिखां बध्वा(३)ऽऽचामेत् । न तु समन्त्रकृत्यार्थं बद्धाऽपि शिखा मोचनीयेति भ्रमः कार्य इत्युपाध्यायाः पठन्ति च ।

---

(१) वा–इति ख. पुस्तके नास्ति । (२) 'पुण्ड्री' इति ख० पुस्तके ।
(३) 'आचामेत्' इत्यारभ्य–'गायत्र्या तु शिखां बध्वा'– इत्यन्तो भागो नास्ति ख. पुस्तके ।

ब्रह्मपुराणे—

गायत्र्यान्तु शिखां बध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः।
जुटिकाञ्च ततो बध्वा ततः कर्म समाचरेत् ॥

स्मृतिः—

शिखिवच्छिखया युक्तो ब्रह्मावर्तनबद्धया।

शिखिवत् शिरोमध्ये, ब्रह्मावर्त्तो ब्रह्मग्रन्थिः, स च द्विगुणीकृत-(१)योग्रोटी तस्य द्विः प्रदक्षिणीकृत्य पश्चाद्भागं संवेष्ट्य पाशान्तर्भावे गर्भजादित्याहुः। एवञ्च सार्द्धभ्रमिद्वयं सम्पद्यते प्रवरार्द्धमितैव भ्रमिरिति साम्प्रदायिकाः।

छन्दोगपरिशिष्टे—

सव्ये पाणौ कुशान्कृत्वा कुर्यादाचमनक्रियाम्।
सव्यः सोपग्रहः कार्यो(२)दक्षिणः सपवित्रकः ॥

पवित्रम्।

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्र चित् ॥

इति कात्यायनेन लक्षितम्। अ(३)न्यत्र संन्यासपद्धतिलिखितं वाक्यं पठन्ति।

सव्यापऽसव्यवलितं ब्रह्मग्रन्थिसमन्वितम्।
लङ्घयेत्प्रथमं पर्व द्वितीयं न कदाचन ॥

पर्व=दक्षिणाऽनामिकायाः।

ग्रन्थिर्यस्य पवित्रस्य न तेनाऽऽचमनं चरेत्।
मोहादाचमनं कृत्वा रुधिरप्राशनं भवेत् ॥

इति(४) तु वचनं प्रामाणिकनिबन्धृभिरनादरात् शिष्टाचारविरोधाच्च हेयमेवेति। लघुहारीतः—

दर्भहीना च या सन्ध्या यच्च दानं विनोदकम्।
असंख्यातं च यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥

योगी—

ईशानाभिमुखो भूत्वा शुचिः प्रयतमानसः।
आचान्तः पुनराचामेदतस्मीत्यभिमन्त्रितम् ॥

---

(१) द्विगुणीकृतमोटी—इति ख० पुस्तके। (२) कुर्यात्—इति ख. पुस्तके।
(३) अत्र—इति ख. पुस्तके। (४) तु—इति क. पुस्तके नास्ति।

आन्तरं शुध्यति ह्येवमन्नपानमलीकृतम् ।

शुचिः स्नानेन मार्जनादिना वा सम्पादितशरीरशुद्धिः ।
तथा च जाबालिः—

अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् ।
आर्द्रेण वाससा वाऽपि दैहिकं मार्जनं विदुः ॥

कर्मिणां कर्मचिकीर्षूणाम् । योगी—

'कालदोषादसामर्थ्या'दित्यादि लिखितम् । हारीतोऽपि–'आपोहिष्ठेति च ब्राह्म'मित्याद्यन्यत्र विस्तरः । 'आचान्तः पुनराचामे'दिति । सन्ध्योपक्रमे पूर्वं कृताचमनः 'स्मृत'मित्यभिमन्त्र्य पुनराचामेदित्यर्थः । मन्त्रकरणकं द्विराचमनमिति तु मिश्राः । 'त्रिरावर्त्य तु सावित्री'-मित्यादि योगिवचनं तु लिखितं व्याख्यातञ्च । योगी—

पूर्वा सन्ध्या तु गायत्री सावित्री मध्यमा स्मृता ।
या भवेत्पश्चिमा सन्ध्या सा तु देवी सरस्वती ॥
रक्ता भवति गायत्री सावित्री शुक्लवर्णिका ।
कृष्णा सरस्वती ज्ञेया सन्ध्यात्रयमुदाहृतम् ॥

रूपकथनं ध्यानार्थम् । छन्दोगपरिशिष्टे—

रक्षयेन्ते वारिणाऽऽत्मानं परिक्षिप्य समन्ततः ।

अन्ते पूर्वोक्तमार्जनकर्मणः आत्मानं वारिणा परिक्षिप्य रक्षा कार्या । आचारात् 'आपो मामभिरक्षन्तु'इत्युच्चार्य 'ॐ भूर्भुवःस्व'रिति मन्त्रो ऽत्र करणमिति वर्द्धमानः । बृहस्पतिः—

बध्वाऽऽसनं नियम्य स्वं स्मृत्वा ऋष्यादिकं ततः ।
सन्निमीलितदृग्मौनी प्राणायामान् समभ्यसेत् ॥

आसनम् ।

पाद्ममर्द्धासनं वापि तथा स्वस्तिकमासनम् ।

इति वायुपुराणाद्युक्तम् ।

ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ।
अङ्गुष्ठौ(१) च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः ॥
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् ।
जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ॥
ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते ।

---

(१) इदं सार्द्धं पद्यं ख० पुस्तके नास्ति ।

इत्यादि लक्षितम्। अत्र पद्मासने प्रथमं दक्षिणस्य तदुपरि वामस्य चरणस्य न्यासः। तदुक्तम्—

वामोरूपरि दक्षिणञ्च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम्।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकये—
देतद्व्याधिविघातिकारि यमिनां पद्मासनं प्रोच्यते॥

स्वस्तिके च प्रथमं वामस्य तदुपरि दक्षिणस्य न्यासः। तदुक्तं पातञ्जलटीकायां—'सव्यं चरणं दक्षिणजङ्घोर्वोरन्तरे निक्षिपेत्, दक्षिणञ्च वामजङ्घोर्वोरन्तरे तदेतत्स्वस्ति(१)क'मिति। अयन्तु विशेषः—कर्मकाले ऊर्वोरूर्ध्वं व्यत्यासेन चरणद्वयन्यासमात्रं पद्मासनपदेन अभिप्रेतम्। अन्यथा हस्तव्यापृतत्वेनाऽग्रिमक्रियाविरोधात् इति प्राहुः।स्वं आत्मानं मन इति यावत्। नियम्याऽसूनिति पाठे प्राणायामपदं मन्त्रपरम्। ऋष्यादिकं स्मृत्वाऽसून्नियम्येति च योजनार्थात्। ऋष्यादिस्वरूपं योगी-

यद्येन ऋषिणा दृष्टं सिद्धिः प्राप्ता च येन वै।
मन्त्रेण तस्य तत्प्रोक्तं ऋषेर्भावस्तदार्षकम्॥
छादनाच्छन्द इत्युक्तं वाससी इव चाऽऽकृतेः।
आत्मा संछादितो देवैर्मृत्योर्भीतिस्तु वै पुरा॥
आदित्यैर्वसुभी रुद्रैस्तेन छन्दांसि तानि वै।
यस्य यस्य तु मन्त्रस्य उद्दिष्टा या तु देवता॥
तदाकारं भवेत्तस्य देवत्वं देवतोच्यते।
पुरा(२) कल्पे समुत्पन्ना मन्त्राः कर्मार्थमेव च।
अनेनेदन्तु कर्तव्यं विनियोगः स उच्यते॥

तथा—

आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः॥
अविदित्वा तु यः कुर्यात् याजनाऽध्यापनं जपम्।
होममन्तर्जलादीनि तस्य चाऽल्पं फलं भवेत्॥

ब्राह्मणेन=विप्रेण,उपलक्षणमिदम्। एवं पञ्चविधं योगमिति वेदरूपब्राह्मणान्तर्भावेन पञ्चविधत्वं प्रकारान्तरमधिकफलार्थं वा। अत्र ॐकारसप्तव्याहृतिशिरसां प्राणायामपूर्वमव्यवहितक्रमेण ऋष्या-

(१) पुरा इत्यारभ्य—विनियोगस्तथैव च—इत्यन्तं ख. पुस्तके नास्ति।

दिस्मरणं मिलितानामेव तेषां विनियोगात् । 'आपोहिष्ठा'दीनान्तु प्रत्येकं विनियुक्तानां तत्पूर्वं (१) प्रत्येकन्यायप्राप्तस्याऽव्यवधानस्य तथैवोपपत्तेः । 'ऋत'मिति प्रथमाऽऽचमने 'अन्तश्चरसी'त्याचमने 'गायत्र्यसी'ति गायत्र्युपस्थाने ऋष्यादिस्मरणं नास्तीत्युपाध्याय-स्वरसः । अत्र अघमर्षणसूक्तादेश्च ऋष्यादिकं प्रसिद्धम् । अत्र ऋष्यादि-स्मरणे शब्दप्रयोगो न कार्यो मानाऽभावादसम्बद्धव्यवायापत्तेश्चेति मिश्राः । योगी–

प्राणस्याऽऽयमनं कृत्वा आचामेत्प्रयतोपि सन् ।

प्राणायामप्रकारं वक्ष्यति मैत्रायणीयगृह्यपरिशिष्टे–

प्रातः 'सूर्यश्च मे'त्युक्त्वा सायं'मग्निश्चमे'ति च ।
'आपः पुनन्तु' मध्याह्ने कुर्यादाचमनन्तथा ॥

अस्य वचनस्य राजाद्यलिखितत्वेन प्रकृताचमनेषु तत्तन्मन्त्र-सम्बन्धे शिष्टाचार एव प्रमाणमित्युपाध्यायः ।

प्राणानायम्य सम्प्रोक्ष्य त्र्यृचेनाऽब्दैवतेन तु ।

विभागमाह व्यासः—

विष्णुः'—'वोपोवो(?)ऽष्टौ क्षिपेन्मूर्ध्नि अघौघस्य क्षयाय च ।

प्रकारमाह कात्यायनः—

शिरसो मार्जनं कुर्यात्कुशैः सोदकविन्दुभिः ।

यथा द्रुपदा ।

ॐकारो व्याहृतीः सप्त गायत्रीः शिरसा सह ।
'आपोहिष्ठे'त्यृचस्तिस्रो 'द्रुपदा'घमर्षणम् ॥
'उदुद्वयं' 'तच्चित्रं' 'तत्तेजोऽसी'ति यथाक्रमम् ।
गायत्री उत्तरीयश्च सन्ध्यामेभिः समापयेत् ॥

इति शातातपेन तथैव मन्त्रविधानात् । 'द्रुपदं चे'त्यत्र 'सूक्तं चैव'-मिति पाठेऽपि उक्त एव क्रमः ।

सर्वत्र मार्जनं कर्म अब्लिङ्गानामुदाहृतम् ।

इत्युक्त्वा=द्रुपदा ऋष्यादिकमुक्त्वा ।

अपः पाण्योः समादाय त्रिः पठेद् द्रुपदामृचम् ।
तत्तोयं मूर्द्ध्नि विन्यस्य सर्वपापैः प्रमुच्यते ॥

---

(१) तत्सर्वे—इति ख० पुस्तके ।

इति योगि(१)याज्ञवल्क्यीयपाठक्रमात् । ततोऽघमर्षणं तत्प्रयोगः (२)परिशिष्टे—

करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च ।
जपे(३)दनायतासुर्वा त्रिः सकृद्वाऽघमर्षणम् ॥

अनायतासुर्वेति आयतासुरिति पक्षान्तरं दर्शितम् । शङ्खः—

उपस्पृशेत्ततः पश्चान्मन्त्रेणाऽनेन धर्मतः ।

'अन्तश्चरसी'त्यादि । एतच्चाऽऽचसनं मार्जनानन्तरं श्रुतमप्यघमर्षणानन्तरमनुष्ठेयम् । एतदनन्तरं शङ्खेनैव सूर्याञ्जलिविधानात् । छन्दोगपरिशिष्टे—

उत्थायाऽर्कं प्रतिरोहेत्त्रिकेणाऽञ्जलिमम्भसः ।

त्रिकेण—

प्रणवो 'भूर्भुवः स्वश्च' सावित्री च तृतीयका ।

इति प्रागुक्तेन सूर्यं प्रति जलाञ्जलिं क्षिपेदर्थात्सूर्यमुद्दिश्य त्यागोऽयम् । जलाञ्जलौ पुष्पाण्यपि मिश्रणीयानि । 'पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षेत्' 'उद्यन्नुदुत्यं चित्रं तच्चक्षु'रिति 'गायत्र्या च यथाशक्ति'इति कात्यायनात् । पुष्पजलाञ्जलिं स्वमौलितुल्यदेशमादाय प्रदक्षिणं प्रक्रम्य क्षिपेत् । 'यत्प्रदक्षिणं प्रक्रामन्ति तेन पाप्मानमवधुन्वती'ति श्रुतेः । गायत्र्या चेति जपजाप्यसाधारणेन सन्ध्यान्तर्गतमप्राप्त्यर्थम् । स च 'उभे सन्ध्ये जपन् जाप्यमुपासीत यथाविधी'ति वचनेषु स्फुट एव । परि(४)श्रुतेस्तु सावित्रीजपः पृथगपीति मन्तव्यम् । अन्ये तु–'जपेन्नित्यं सर्वकल्मषनाशिनीम्' इति ।

जपेदहरहः स्नात्वा सावित्रीं जपविद् द्विजः ।

इत्यादिभिर्बोधितम् । गायत्रीजपरूपकर्मान्तरमेवेह विधीयते, परन्तु प्रधानभूतस्वतन्त्रेण तर्पणेन स्नानाङ्गतर्पणस्येव स्वतन्त्रगायत्रीजपेनैव सूर्योपस्थानस्याऽपि प्रसङ्गत एव सिद्धेर्न तदर्थं पृथग्गायत्रीपाठ इति वदन्ति । सूर्योपस्थानकरणमन्त्राणां तु ऋष्यादिस्मरणमावश्यकम् ।

---

(१) योगि —इति क० पुस्तके नास्ति ।

(२) तत्प्रयोग—इत्यस्य स्थाने—तत्र योगः छन्दोऽघमर्षणं–इति ख० पुस्तके पाठः ।

(३) जपेत्—इति ख० पुस्तके पाठः ।

(४) फलश्रुतेः—इति ख० पुस्तके ।

चित्रं देवेति च ऋच ऋषिः कौत्स उदाहृतः ।
त्रिष्टुप् छन्दो दैवतश्च सूर्योऽस्याः परिकीर्तितः ॥
अग्निष्टोम उपस्थाने विनियोगस्तथैव च ।

इति व्यासेन सन्ध्याप्रकरणेऽभिधानस्य एकत्र निर्णीत इति न्यायेना-ऽन्यत्राऽपि तत्सम्बन्धाऽभिप्रायकत्वात् । इदन्त्ववधेयं शिष्टाचारानुसारि ऋष्यादिकमिह प्रसिद्धमेव (१)सर्वानुक्रमण्यांतु 'उदुद्वयं सौरी अनुष्टुप्प्रस्कण्वस्य उदुत्यं प्रस्कण्वः सौरी गायत्री चित्रं कुत्स आङ्गिरसस्त्रैष्टुभं तच्चक्षुः पुर उष्णिक् सौरी'त्युक्तम्। अत्राद्याज्जला-दुप(२) क्रमणे मध्ययोर्दक्षिणहोमे चतुर्थ्या भद्रावीरशान्तिकरणे वि-नियोगः इति कातीयकल्पः। गायत्रीजपे योगी—

प्रणवो भूर्भुवः स्वश्च अङ्गानि हृदयादयः ।
त्रिरावर्त्य ततः पश्चादार्षं छन्दश्च दैवतम् ॥
विनियोगस्तथा रूपं ध्यातव्यं क्रमशस्तु(३) वै ।

अत्र ॐ हृदयाय नमः ॐ भूः शिरसे स्वाहा ॐ भुवः शिखायै वषट् ॐ स्वः कवचाय हुं ॐ भूर्भुवः स्वः नेत्रत्रयाय(४)वौषट् ॐ भूर्भुवः स्वः अस्त्राय फडिति केवलेन ॐकारेण तत्सहितया प्रथमया व्याहृत्या तादृश्या द्वितीयया तादृश्यैव तृतीयया तादृशेनैव च व्याहृतित्रयेण तादृशेनैव च व्याहृतिरूपेण षडङ्गन्यासमाचरन्ति । तत्र तु वासना चिन्तनीया, परं त्वीदृशाचारस्य बहुतरमहाजनसं-मतत्वेन नाऽत्राऽधिकमभिनिवेशः क्रियत इति गायत्रीरूपमाह स एव—

श्वेतवर्णा समुद्दिष्टा कौशेयवसना(५)शुभा ।
श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता ॥
आदित्यमण्डलान्तःस्था ब्रह्मलोकगताऽथवा ।
अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥

---

(१) अनुक्रमण्या—इति ख० पुस्तके ।
(२) जलदुपात्क्रमणे—इति क० पुस्तके पाठः ।
(३) च—इति ख० पुस्तके ।
(४) नेत्राभ्यां—इति क० पुस्तके, नेत्रत्रयाभ्यां—इति च ख० पुस्तके पाठः ।
(५) तथा—इति ख० पुस्तके ।

आवाह्य यजुषाऽनेन 'तेजोऽसी'ति विधानतः ॥
ततो(१) वाह्यं जपित्वा तु नमस्कृत्य विसर्जयेत् ।

एवं चाऽविशेषे तत्तद्वचनबलात्सन्ध्यात्रयेऽपि गायत्री शुक्लैव ध्येया। केचित्तु 'प्रातर्ब्रह्माणी रक्ता, मध्यान्हे वैष्णवी कृष्णा, सायं माहेश्वरी शुक्ला' इति त्रिरूपा गायत्री ध्येयेति वदन्ति। पठन्ति चैतन्मूलतया सुबह्न्यनाकरवाक्यानीति। अत्र चाऽऽवाहनादनन्तरं जपात्प्रागेव गायत्र्या उपस्थानं ब्राह्मणेन। तथा च शतपथश्रुतिः–'तस्या उपस्थानं गायत्र्यत्रस्येकपदी द्विपदी त्रिपदी चतुष्पद्यसि न हि पद्यसे नमस्ते तुरीयाय दर्शनाय पदाय परोरजसे सावदोमाप्राप'दिति । 'यं विष्पादस्मैकामो मासमर्द्धी(२)तिष्वानहैवास्मै स कामः समृद्ध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्राप'दिति वा बौधायनः। उपतिष्ठेत वा एतां देवीं तुरीयेण पादेन। अथाऽभ्युदाहरन्ति गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यसि(३)न हि पद्यसे नमस्ते तुरीयाय दर्शनाय पदाय परो रजस इत्यथैनां जपति। 'अथापी'त्यादिना तुरीयपादस्य स्वरूपकथनम्। एवञ्च श्रुतावपि 'परो रजस'इत्यन्त एव मन्त्रः, अग्रे चाऽर्थवाद इत्युपाध्यायादयः। अन्ये तु 'मा प्राप'दित्यन्तो मन्त्रः श्रुताविति-शब्देन तावद् दूरस्य व्यवच्छेदात्। बौधायनसूत्रन्तु राजाद्यलिखितत्वान्निर्मूलमेव। समूलत्वेऽपि बौधायनतैत्तिरीयसूत्रकारत्वेन माध्यन्दिनीयैः शतपथोक्त एव मन्त्रो ग्राह्य इत्याहुः। यत्तु—

गायत्र्यस्यैकपद्याद्यैरुपस्थाय ततो जपेत् ।
उपस्थाय तुरीयेण तेनैव च विसर्जयेत् ॥
अष्टाक्षरपदन्तत्तु परो रजसे सावदोम् ।

इति मन्त्रप्रकाशानुसारात् सावदोमित्यन्त एवायं मन्त्र इति, तन्न शतपथविरोधात् ।

अजपां नाम गायत्रीं जीवो जपति सर्वदा ।
हंस इत्येव तन्मन्त्रं स च पादश्चतुर्थकः ॥

---

(१) तत्र—इति ख० पुस्तके ।
(२) मासमध इति वा नहैवास्मै—इति ख० पुस्तके ।
(३) चतुष्पदपदासि—इति ख० पुस्तके ।

इति काशीखण्डविरोधाच्चेत्यपि कश्चित्। अत्र 'ऽथोपतिष्ठे'दित्यादि पूर्वलिखितयोगिवचनमवलम्ब्य 'आगच्छे'त्यादि 'स्मृते'त्यन्तं गायत्रीजपात्पूर्वं केचित्पठन्ति। जप्यमाह योगी-

ॐङ्कारः पूर्वमुच्चार्यो भूर्भुवः स्वस्ततः परम् ।
गायत्री प्रणवश्चाऽन्ते जप्ये ह्येवमुदाहृता ॥

यमः (१)—

सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीन्तु जपेन्नित्यं सर्वकल्मषनाशिनीम् ॥

बौधायनः-'शतकृत्वो ऽपरिमितकृत्वो वा दशावराम्' । अपरिमितकृत्वः=दशोपरि शतादर्वागनियतसङ्ख्यमित्यर्थः। गोभिलः—

कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत् ।
गायत्र्यग्निमुखी देवी तस्मादुत्थाय तां जपेत् ॥

बृहस्पतिः—

मार्जनं जलमध्ये तु प्राणायामो यतस्ततः ।
उपस्थानं ततः पश्चात्सावित्रीजप उच्यते ॥

मार्जनं मन्त्रस्नानाङ्गं (२)यतस्ततः=जले स्थले वा । एवं प्राणायामोपस्थानयोः सन्ध्यान्तर्गतयोरुभयत्र विधानादुपस्थानपर्यन्ता सन्ध्याजलेऽप्यस्य मते । गायत्रीजपस्तु स्थल एवोक्तः । कात्यायनेन तु तीर्थसन्ध्यावन्दनमुक्तम् । नारसिंहेऽपि 'स्नानोत्तरं तर्पणात्प्रागभिहितम् ।

दर्भेषु दर्भपाणिः सन् प्राङ्मुखः सुसमाहितः ।
प्राणायामांस्तु कुर्वीत यथाशास्त्रमतन्द्रितः ॥
जपेदहरहः स्नात्वा सावित्रीं जपविद्द्विजः ।
अथ पुष्पाञ्जलिं क्षिप्त्वा भानवे चोर्ध्वबाहुकः ॥
तत्तुल्यं च जपेन्मन्त्रं चित्तं 'तच्चक्षु'रित्यपि ।
प्रदक्षिणमुपावृत्त्य नमस्कृत्य ततः प्रभुम् ॥

अत्र दर्भेष्विति श्रवणात्स्थल एव सन्ध्याकरणमायाति। जपानन्तरमुपस्थानं प्रकारान्तरं बौधायनेऽपि दर्शनात्। हारीतः-

---

(१) यमः—इति क० पुस्तके नास्ति ।

(२) मन्त्रस्नानान्तं- इति क० पुस्तके ।

'सावित्रीं जपन् पापेभ्यो मुच्यते शतं जप्त्वा मानसात् पूतो भवति सहस्रं जप्त्वा वाक्कृतात् पूतो भवति'। यमः—

न तथा वेदजप्येन पापं निर्दहति द्विजः।
यथा जपेन सावित्र्याः सर्वपापैः प्रमुच्यते ॥

जपविधौ शङ्खः—कुशबृस्यामासीनः कुशान्तरायां वा कुशपवित्रपाणिरुदङ्मुखः सूर्याऽभिमुखो वाऽक्षमालामादाय देवतां ध्यायन् जपं कुर्यात्। सुवर्णमणिमुक्तास्फटिकपद्माक्षेन्द्राल(१)रुद्राक्षपुत्रंजीवकानामन्यतममालां कुर्यात्। कुशग्रन्थियुतां वा हस्तोपयामैर्वा गणयेत्।

बृसीं लब्ध्वासनं हस्तोपयामोङ्गुलिनामनम् ?।

योगी—

तिष्ठंश्चेद्वीक्षमाणोऽर्कं जपं कुर्यात्समाहितः।
अन्यथा प्राङ्मुखः कुर्याद्वक्ष्यमाणक्रमेण तु ॥
प्राक्कूलेषु कुशेष्वेव आसीनश्चाऽऽसने शुभे।
नात्युच्छ्रितो नातिनीचो दर्भपाणिः सुसंयतः ॥
स्फटिकेन्द्राक्षरुद्राक्षपुत्रञ्जीवप्रवालकैः।
अक्षमाला हि कर्तव्या उत्तमा ह्युत्तरोत्तरा ॥

प्राक्कूलेषु प्रागग्रेषु। नारसिंहे—

त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत।
वाचिकश्च उपांशुश्च मानसश्च त्रिधा मतः ॥
त्रयाणां जपयज्ञानां श्रेयः स्यादुत्तरोत्तरः।
यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ॥
मन्त्रमुच्चारयेद्व्यक्तं जपयज्ञः स वाचिकः।
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ॥
किञ्चिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः।
ध्येया यदक्षरश्रेण्यो वर्णाद्वर्णं पदात्पदम् ॥
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः।

एवञ्च त्रिविधस्याऽपि जपस्य विधानात्।

नोच्चैर्जपं बुधः कुर्यात्सावित्र्याश्च विशेषतः।

---

(१) लरुद्रा—इति क० पुस्तके नास्ति।

इति शङ्खवचनमल्पफलाऽभिप्रायम् ।

ध्यायेत्तु मनसा मन्त्रान् जिह्वोष्ठौ न विचालयेत् ।
न कम्पयेच्छिरो ग्रीवां दन्तान्नैव प्रकाशयेत् ॥

इति योगिवचनं मानसविषयम् ।

योगी—

नचङ्क्रमन्न च हसन्न पार्श्वमवलोकयेत् ।
न प्राशितो ? न जल्पंश्च न प्रावृतशिरास्तथा ॥
न पदा पदमाक्रम्य न चैव हि तथा करौ ।
न वा समाहितमना न वसन् श्रावयन् जपेत् ॥
न क्लिन्नवासाः स्थलगो जपादीनाचरेद्बुधः ।
व्रतादृते नार्द्रवासा नैकवासाः समाचरेत् ॥
न जीर्णेन मलिनेन परिक्लिष्टेन वा जपेत् ।
यक्षराक्षसभूतानि सिद्धविद्याधरा (१)गणाः ॥
हरन्ति प्रसभं यस्मात्तस्माद्धुतं समाचरेत् ।
जपकाले न भाषेत व्रतहोमादिके तथा ॥
एतेष्वेवावसक्तं च यद्यागच्छेद्द्विजोत्तमः ।

स्मृतिः—

नैकवस्त्रः प्रवर्त्तेत द्विजवाचनिके जपे ।
अभिवाद्य ततो विप्रं योगक्षेमं च कीर्त्तयेत् ॥
तूष्णीमासीत च जपंश्चाण्डालपतितादिकान् ।
दृष्ट्वा तद्वार्युपस्पृश्याऽऽभाष्य स्नात्वा पुनर्जपेत् ॥

'अवसक्तं प्रवृत्तं योगादिकीर्त्तनञ्च दन्तसन्धाने सत्येव दन्तैर्दन्तान् सन्ध्यायाऽन्तर्मुख एव यावदर्थमभिभाषेते'ति तेनैवाऽभिधानात् । तदपि(२)'संस्कृतेनैव न म्लेच्छितवै नापपितवै'इति श्रुतेः ।

तथा—

यदि वा यमलोपः स्याज्जपादिषु कथञ्चन ।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥

---

(१) गुणा—इति ख० पुस्तके ।
(२) यदपि—इति ख० पुस्तके ।

बौधायनः—

काषायवासाः कुरुते जपहोमप्रतिग्रहान्।
न तद्देवगमं भवति हव्यकव्येष्वथो हविः ॥

व्यासः—

आर्द्रवासाश्च यः कुर्याज्जपं होमं प्रतिग्रहम् ।
सर्वं तद्राक्षसं विद्याद्बहिर्जानु च यत्कृतम् ॥

वसिष्ठः—

जपहोमोपवासेषु धौतवस्त्रधरो भवेत् ।
अहङ्कृतः शुचिर्मौनी श्राद्धादौ विजितेन्द्रियः ॥

लघुहारीतः—

जपहोमे तथा दाने स्वाध्याये पितृतर्पणे।
अशून्यं तु करं कुर्यात् सुवर्णरजतैः कुशैः॥

अत्र सुवर्णधारणं दक्षिणनामिकायाम्।

अनामिकायां तद्धार्यं दक्षिणस्य करस्य च ।

इति हेमप्रकरणीयदेवीपुराणात्तत्सन्दंशाद्रजतकुशधारणमपि तत्रैव । 'तर्जन्यां रजतं धार्य'मिति त्वमूलम् ।

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥
क्रियां यः कुरुते मोहादनाचम्येह मानवः ।
भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः ॥
इत्यादीनि ।
विधिहीनं भावदुष्टं कृतमश्रद्धया च यत् ।
उद्धरन्त्यसुरास्तस्य मूढस्य ह्यकृतात्मनः ॥

तथा—

प्रमादात्कुर्वतां कर्म प्रच्यवेताऽध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

इत्यन्तानि वचनानि उपाध्यायादिभिर्जपप्रकरणे लिखितानि च। प्रणवव्याहृतित्रयसहितगायत्रीमधिकृत्य—

योऽधीतेऽहन्यहन्येतां त्राणि वर्षाण्यतन्द्रितः ।
स ब्रह्म परमभ्येति वायुभूतः (१) स्वमूर्तिमान् ॥

---

(१) वायुर्भूत·—इति ख० पुस्तके ।

तथा—

सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः ।
सुरापश्च विशुद्ध्यन्ति लक्षजापान्न संशयः ॥

इत्यादीनि तत्तत्फलार्थत्वादिति गायत्रीजपानन्तरं (१)कार्यम् । कात्यायनः—'विभ्रा'डित्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्य । अयञ्च जपः काम्यः ।

सन्ध्यात्रयेऽप्युपस्थानमेतदाहुर्मनीषिणः ।
मध्याह्न उदये वाऽपि 'विभ्राडा'दीच्छया जपेत् ॥

इति परिशिष्टात् । उदयेऽपीत्यभिधानादुदयमात्रानन्तरमपि । मध्याह्नसन्ध्यावन्दनमिति पारिजातः । नमस्कृत्य सूर्यं, उपस्थानकर्मत्वेन तस्यैवोपस्थितत्वात् । 'नमस्कृत्य ततः प्रभु'मिति नारसिंहाच्चेति । मिश्रास्तु गायत्रीं नमस्कृत्येति कात्यायनसूत्रार्थ इति व्याख्यातवन्तः । तेषामयमाशयः-गायत्रीमधिकृत्य ।

तत्राऽऽवाह्य जपित्वा तु नमस्कृत्य विसर्जयेत् ।

इत्यावाहनादिपूर्वाऽपरक्रियासु गायत्र्या एव कर्मत्वेनाऽन्वयात्तन्मध्यपठितायां नमस्क्रियायामपि स एव युक्तिमानिति । 'नमस्कृत्य ततः प्रभु'मित्यत्रापि प्रभुशब्देन गायत्र्येवाऽभिमता, 'गायत्र्यभिमुखी'त्यादौ देवीत्वादिना कीर्तनादिति । आदित्यगायत्र्योर्द्वयोरपि नमस्कार इति तु ऋजवः । विसर्जने तु यद्यप्युपाध्यायैर्मन्त्रो न लिखितः । मिश्रैः पुनस्तूष्णीमिति सिद्धवदुक्तम् । चण्डेश्वरेण तु—

उत्तरे शिखरे जाते भूम्यां पर्वतवासिनि ।
ब्राह्मणैः समनुज्ञाते(२) गच्छ देवि यथासुखम् ॥

इति विलिख्य छन्दोगानामेव मन्त्र इत्युक्तम्, तथापि सर्वैर्ग्राह्योऽविरोधात्, गारुडलैङ्गादिपुराणविहितत्वाच्च । अत एव आचारचिन्तामणौ शौरिणाचारपल्लवेदेववंशेन(?) साधारण्येनैव सिद्धवदयं मन्त्रो लिखित इत्याधुनिकवर्द्धमानाः ।

इत्येष चाऽपिशब्दाभ्यां परमर्षिकटाक्षितः ।
संक्षेपात् दर्शितः प्रश्ने सन्ध्यावन्दनिकः क्रमः ॥ २२ ॥

---

(१) कार्यम्—इति ख० पुस्तके नास्ति ।

(२) समनुज्ञाता—इति ज. पुस्तके पाठः । 'उत्तमे शिखरे जाता भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्' । इति प्रचलितः पाठः ।

(मिता०) स्नानमिति। प्रातःस्नानं यथाशास्त्रम्। अब्दैवतैर्मन्त्रैरापोहिष्ठेत्येवमादिभिर्मार्जनम्। प्राणसंयमः प्राणायामो वक्ष्यमाणलक्षणः। ततः सूर्यस्योपस्थानं सौरमन्त्रेण। गायत्र्यास्तत्सवितुर्वरेण्यमित्या(१)द्यायाः प्रतिदिवसं जपः(२)। कार्यशब्दो यथालिङ्गं प्रत्येकमभिसम्बध्यते॥ २२॥

(वी० मि०) प्राणायामो द्विविधः, सवीजोऽवीजश्च। तथा च विष्णुपुराणम्—

प्राणाख्यमनिलं वश्यमभ्यासात्कुरुते तु यः।
प्राणायामः स विज्ञेयः सवीजोऽवीज एव च॥

सवीजः=सगर्भः, मन्त्राद्यालम्बन इति यावत्। तदुक्तमभियुक्तैः—

जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः।
तदपेतं विगर्भञ्च प्राणायामं परं विदुः॥

सोऽपि प्रत्येकं त्रिधा। तथा चोक्तं मार्कण्डेयपुराणे—

लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधा मतः।
तस्य प्रमाणं वक्ष्यामि तदलर्क ! शृणुष्व मे॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः।
त्रिगुणाभिस्तु मात्राभिरुत्तरीय उदाहृतः॥
निमेषोन्मेषणा मात्रा तालो लघ्वक्षरं तथा।

यत्तु पातञ्जलटीकायां 'षट्त्रिंशन्मात्राभिः प्रथम उद्घातो मन्दः स एव द्विगुणीकृतो द्वितीयो मध्यमः स एव त्रिगुणीकृतस्तृतीयस्तीव्र इति वाचस्पतिमिश्रैरुक्तम्, तन्मुख्यं पक्षान्तरमिति। तत्र प्रकृते प्राणायामः कीदृगित्याकाङ्क्षां पूरयन्नेव सन्ध्यान्तर्गते प्राणायामे जपविशेषरूपमङ्गं वि(३)धत्ते—

गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम्॥
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः॥ २३॥

अत्राऽयंशब्दः स इति समानार्थः। 'पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा [रघु० ८।४] इत्यादाविव। तस्य च यत्पदसापे-

(१) मित्यादेः ख।
(२) जपः कार्यः ख।
(३) विधत्ते -इति ख. पुस्तके।

क्षत्वात्सप्तम्यन्तं तदिहाऽध्याह्रियते, तेन 'शिरसे'त्यादिविशेषणविशिष्टां गायत्रीं यत्र जपेत्स(१)प्राणसंयमः क्रियेतेत्यर्थः । क्रियेरन्नित्यध्याहृतस्य विभक्तिविपरिणामेनाऽनुवृत्तेः । यद्वयस्तु–प्राणसंयमस्वरूपमाह गायत्रीमित्यवतारयन्ति । तच्चिन्त्यम्, प्राणसंयमशब्दार्थस्याऽनभिधानात् । (२)न च तादृग्रूप एव तदर्थः(३)उच्छृङ्खलस्याऽपि तस्य प्राणसंयमत्वापत्तेः । न चाऽऽयतप्राण इति कर्त्रध्याहारान्नैष दोषः । अत एव शङ्खबृहस्पतिवसिष्ठाऽङ्गिरःपैठीनसिबौधायनाः—

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते ॥

इति । छन्दोगपरिशिष्टे कात्यायनः—

भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः (४) ।
महर्जनस्तपः सत्यं गायत्री च शिरस्तथा ॥

'आपो ज्योतिरसोऽमृतं ब्रह्म भूर्भुवः स्व'रिति शिरः। प्रतिप्रतीकं प्रणवमुच्चारयेदन्ते च शिरसः ।

एता एतां सहाऽनेन तथैभिर्दशभिः सह ।
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते ॥

इति। आयतप्राण इति विशिशिषुरिति वक्त(५)व्यम् । अध्याहारगौरवात् । न च पक्षान्तरेऽपि कर्त्रपेक्षा(६)पूरणाय तदाश्रयणमावश्यकम्, अव्यहितपूर्ववचनेऽवश्याऽध्याहार्यस्याऽऽवृत्त्यैवोपपत्तेः । अध्याहारापेक्षया तस्य लघुत्वात्। आयतासुत्वापेक्षया लघुधर्मान्तरमेव पुरस्कृत्य तस्यौचित्याच्च । न चाऽन्यपक्षे क्रियानुवृत्तिगौरवं सर्वं हि वाक्यं क्रियया परिसमाप्यत इति, तदावृत्त्यादेः सर्वैरेवाऽङ्गीकरणीयत्वात् । अन्यथा कर्त्रा(७)वृत्त्यादिरपि नाऽभ्युपे(८)या, युक्तिसाम्यात्(९) । किञ्च तत्पक्षे(१०) 'पिकः कोकिल इत्यपि' इति पि-

(१) एतदादिः–तच्चिन्त्यम्–इत्यन्तो भागः ख. पुस्तके नास्ति ।
(२) न च–इति ख. पुस्तके नास्ति । (३) शब्दार्थः–इति ख. पुस्तके पाठः ।
(४) 'महाव्याहृतयोऽव्ययाः'–इति ख. पुस्तके पाठः ।
(५) वक्तव्यम्–इति ख. पुस्तके नास्ति । (६) कर्त्रपेक्षया–इति ख. पुस्तके पाठः ।
(७) प्रवर्त्ता–इति क. पुस्तके । (८) नाऽभ्युपेक्ष्या,–इति ख० पु० पाठः ।
(९) युक्तिसामान्यात्–इति क० पु० पाठः ।
(१०) त्वत्पक्षे–इति ख. पु. पाठः ।

कशब्दस्येवाऽत्र प्राणसंयमशब्दस्य स्वार्थत्वरूपेण स्वार्थलक्षणापत्तिः। अन्यथा पौनरुक्त्यवज्रलेपादिति सचेतसा भाव्यम्। भवतु वोक्तजप एवाऽयंशब्दार्थः। तस्य संयमपदार्थाभेदान्वयः 'संयम्यतेऽनेने'ति करणव्युत्पत्तेः। द्वादशमात्राभिरिति मात्राणामिव जपस्याऽपि अवच्छेदादिप्रयोजकतया प्राणायामकरणत्वसम्भवात्। 'यजमानः प्रस्तरः' इत्यत्र यजमानशब्दस्येव संयमशब्दस्य गुणवृत्याश्रयणाद्वा। तत्प्रयोजनं प्राणसंयमस्वरूपमिव तदङ्गयुक्तजपोऽप्यत्यावश्यक इति न, तदभावे प्राणायामविधिनिर्वाह इति प्रतिपत्तिरेवेत्यवान्तरकथनात्। जपप्राणायामस्वरूपमिति त्वश्रद्धेयमेव। तथा हि प्राणसंयमशब्दे प्राणायाम एवात्रोच्यतेऽन्याभि(१)धानस्य विचारासत्त्वात्। 'त्रिरायम्याऽसू'निति कात्यायनस्मृत्याद्यैकत्वात् 'प्राणानायम्ये'त्यग्रेऽभिधानाच्च। न वोऽक्तगायत्रीजपः प्राणायामशब्दार्थः, व्युत्पत्तिविरहात्। न चायम्यतेऽनेनेति करणव्युत्पत्तिर्वहुव्रीहिर्वा गौरवात्। कदाचित्तदाश्रयणस्याऽ न्यथाऽनुपपत्तिमूलकत्वात्। न च रूढ्याश्रयणं योगेनैवोपपत्तेः। प्राणपदसमभिव्याहृतेषु नियमसंयमाऽऽयामशब्देषु निसमङामुपसर्गाणामर्थविशेषेणैवाऽनतिप्रसङ्गात्। रूढेरपि योगसमानाऽधिकरणाया एव युक्तत्वाच्च। 'योगरूढि'न्यायात् पङ्कजपदतुल्ययुक्तिकत्वात्, मण्डपपद इव योगरूढत्वे मानाभावात्, प्राणायामशब्दार्थव्युत्पादनपराभियुक्तानुशासनविरोधाच्च। तथा भगवान् पतञ्जलिः—तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः। अत्र वेदव्यासभाष्यम्—सत्यासने बाह्यस्य वायोराचमनं श्वासः, कोष्ठयस्य वायोर्निःसारणं प्रश्वासः, तयोर्गतिविच्छेदः उभयाभावप्राणायाम इति। इहाऽऽचमनं निःसारणमिति भाववाचिभ्यां भवितैव विवक्षितः, कृदभिहितो भावो द्रव्यवत्प्रकाशत इति न्यायात्। 'बिसकिसलयच्छेदपाथेयवन्तः' [मेघ० १।११] इत्यादिप्रयोगप्राचुर्य्यात्। तेनाऽऽचम्यमानो वायुः श्वासः, निस्सार्यमाणः कोष्ठयो वायुः प्रश्वास इति लभ्यते। अत एवोक्तं तयोर्गतिविच्छेद इति भावप्राधान्येऽन्वयोपपत्तेः। टीकाकृतोऽप्याहुः—'रेचकपूरककुम्भकेष्वस्ति गतिविच्छेद' इति। प्राणायामसामान्यलक्षणमेतदिति। तत्र पूर-

(१) इतः प्रभृति—प्राणानायम्येत्यग्रे इत्यन्तो ग्रन्थः ख. पुस्तके नास्ति।

के बहिरवच्छेदेन श्वा(१) सस्याऽपि गतिविच्छेदः, प्रश्वासस्याऽपि गत्यभावः, श्वासगत्यभावस्तु श्वासाऽभावादेव। कुम्भके तु श्वासप्रश्वासयोर्द्वयो(२) रप्यभावात् स्पष्टमेवोभयोर्गतिविच्छेद इति तात्पर्यम् । मार्कण्डेयपुराणमपि—

प्राणाऽपानविरोधश्च प्राणायाम उदाहृतः ।

इति । तथा—

प्राणानामुपसंरोधात्प्राणायाम उदाहृतः ॥

इति । एतेनाऽऽयतप्राण इति स्मृत्यन्तरदर्शनात् । प्राणनिरोधावच्छिन्नः प्रकृतगायत्रीजपः, तदवच्छिन्नः प्राणनिरोधः, तुल्यप्राधान्यादुभौ मिलितौ वा प्राणायाम इति निरस्तं तद्व्युत्पादनप्रवृत्तशास्त्रीयनिरपेक्षानुशासनविरोधात् । अबीजप्रणवादिमात्रबीजप्राणा(३) यामयोरसङ्ग्रहदोषस्य दुष्परिहरत्वाच्च । तस्मात्सामान्यशास्त्रोत्पादितस्वरूप एव । प्राणायामे सन्ध्यान्तर्गते योगिसंहितायाम्—

नीलोत्पलदलश्यामं नाभिदेशे प्रतिष्ठितम् ।
चतुर्भुजं महात्मानं पूरकेणैव चिन्तयेत् ॥
कुम्भकेन हृदि स्थाने ध्यायेच्च कमलासनम् ।
ब्रह्माणं रक्तसर्वाङ्गं चतुर्वक्त्रं पितामहम् ॥
रेचकेनेश्वरं ध्यायेल्ललाटस्थं महेश्वरम् ।
शुद्धस्फटिकसङ्काशं निर्मलं पापनाशनम् ॥

इति ध्यानविशेषरूपमिव प्रकृते जपविशेषरूपमङ्गमुपदिश्यत इत्येव ज्यायः ।

अत्र—

ब्रह्माणं केशवं शम्भुं ध्यायेद्देवाननुक्रमात् ।

इति पक्षान्तरम् । एवं च (४)सबीजः स्वकालावच्छेदाय द्वादशमात्रादिपरिकलनशून्यश्च सन्ध्याप्राणायामः पर्यवस्यति, तत्कालस्य मन्त्रजपेनैवाऽवच्छेदात् । त्रित्वादिकथनस्य योगिप्राणायाममात्रपरत्वात् । एतेन स्मृत्यन्तराण्यपि व्याख्यातानि । उक्तानुसारेणैव तदर्थस्य नेयत्वा-

---

(१) श्वासस्याऽपि गतिविच्छेदः-इति ख. पुस्तके नास्ति ।

(२) द्वयोः-इति क. पुस्तके नास्ति ।

(३) प्राणायामनिरस्तयो—इति ख. पुस्तके पाठः । (४) च-इति क. पुस्तके नास्ति ।

दन्यथाऽनुपपत्तेः । प्राणायामसामान्यलक्षणन्तु 'गायत्री'मित्यादि याज्ञवल्क्योक्तमिति । छन्दोगाह्निकलिखनन्त्वेवं व्याख्येयम् । ननु भवतु प्रत्येकमेव पूरकादीनां प्राणायामत्वं, तथापि कुम्भक एव मन्त्रपाठः । याज्ञवल्क्येन संयमशब्देन तस्योवोक्तेः सम्यक् यम इति व्युत्पत्तेः। अत एव संयम इत्येकवचनमपि सङ्गच्छत इत्यत आह–'प्राणायामसामान्ये'ति । तुशब्दो भिन्नक्रम इति याज्ञवल्क्योक्तन्तु प्राणायामानां त्रयाणां सामान्यं लक्षणं धर्म इत्यर्थः । प्राणायामशब्देन प्राणायामसामान्यस्यैवाऽभिधानादिति भावः । सोऽयं जपः प्राणायामसंज्ञक इति प्रामाणिकलिखनमपि यथाकथञ्चिद्व्याख्येयमिति संक्षेपः । गायत्रीमिति 'तत्सवितु'रित्यादिचतुर्विंशत्यक्षरां सावित्रीमृचामित्यर्थः । तस्या एव तैत्तिरीयकारण्यके प्राणायाममन्त्रत्वेनाऽऽम्नातात् ।

सविता देवता यस्या मुखमग्निस्त्रिपाच्च या ।
विश्वामित्र ऋषिः, छन्दो गायत्री, सा विशिष्यते ॥
विनियोग उपनयने (१)प्राणायामे तथैव च ।

इति योगिना प्राणायामे विनियोगकथनाच्च । शिरसा 'आपोज्योति'–रित्यादिना 'स्वरि'त्यन्तेन छन्दोगपरिशिष्टप्रदर्शितेन यजुषा । सार्द्धं=सह, (२)साहित्यं च तेन गायत्र्याः पश्चात्पठितेन तावतैवाऽप्राधान्येन सहाऽर्थयोगविहिततृतीयोपपत्तेः । लिखितशङ्खादिस्मृतौ प्रकृत(३)वचनेऽपि पाठिकक्रमस्याकोपाच्च । व्याहृतयो=भूराद्याः सप्त छन्दोगपरिशिष्टोक्ताः । प्रतीत्यनन्तरं प्रतीकमित्यध्याहार्यं 'प्रतिप्रतीकं प्रणवमुच्चारयेदन्ते च शिरस' इत्यन्यत्र श्रवणात् । 'संयुक्ता'मित्युपसर्गेणाऽन्तेऽपि प्रणवसम्बन्धमभिप्रैति । त्रिः=वारत्रयं जपेदित्यन्वयः । तेन 'ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यं, ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्, 'ॐ आपो ज्योतिरसोऽमृतं ब्रह्म भूर्भुवः स्वरो'मिति जप्यं पर्यवस्यति ।

एता एतां सहाऽनेन तथैभिर्दशभिः सह ।

इति छन्दोगपरिशिष्टैकमूलकत्वात् । जपस्तु प्राणायामे मानस एव । अन्यथाऽभिमतप्राणनियमनासम्भवात् । अन्ये तु—

(१) प्राणायामे–इत्यारभ्य योगिना–इत्यन्तं ख० पुस्तके नास्ति ।
(२) सरूपं–इति ख० पुस्तके पाठः ।
(३) प्रकृत इति क० पुस्तके नास्ति ।

प्रणवेन तु संयुक्ता व्याहृतीः सप्त नित्यशः ।
सावित्रीं शिरसा सार्द्धं मनसा त्रिः पठेद्विजः ॥

इति संवर्त्तवचनमेवाऽत्र प्रमाणयन्ति । अत्र केचित्=पूरककुम्भकरेचकैर्मिलित्वैकं प्राणायाममिच्छन्ति । तत्राऽपि पक्षत्रयम् । एके-प्रत्येकमेकधा मन्त्रपाठं पूरकादिषु मन्यन्ते । अन्ये-त्रिधा । अपरे-पूरकरेचकयोर्मन्त्रपाठं न मन्यन्ते, कुम्भकमात्रे मन्त्रपाठमिच्छन्ति तत्सर्वमयुक्तम् । तथा हि ।

पूरककुम्भकरेचकैः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्ट उच्छवासो ध्मातः पूरक उच्यते ॥
कुम्भको निश्चलश्वासो रिच्यमानस्तु रेचकः ।

इत्युपक्रम्य योगी—

एवं त्रिविधमुद्दिष्टं प्राणायामस्य लक्षणम् ॥

इत्युपसञ्जहार । विधाशब्दो ह्यवान्तरभेदवाची, अतः सामान्यस्य प्राणायामस्यैते त्रयः प्रभेदा इति प्रत्येकमेव पूरकादीनां प्राणायामत्वम् । स्मृत्यन्तरेऽप्युक्तम् 'त्रिविधः प्राणायामः–पूरकं, कुम्भकं, रेचक'मिति । किञ्च 'स त्वि'ति पूर्णिकया 'बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परि(१)दृष्टो दीर्घसूक्ष्म' इति पातञ्जलसूत्रमवतार्य्य यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः, यत्र श्वासपूर्वको गत्यभावः (२)स आभ्यन्तरः, तृतीयः स्तम्भवृत्तिः यत्रोभयाभावः सकृत्प्रयत्नात्प्रभवती'ति भाष्ये तट्टीकायां च प्राणायामविशेषत्रयलक्षणपरं सूत्रमवतारयति । 'स त्विति' इत्युपक्रमे 'एवं त्रयो विशेषा लक्षिता' इत्युपसंहारे च पूरकादीनां प्रत्येकमेव प्राणायामत्वमिति स्पष्टमुक्तमिति । अतः पूरकादिषु प्रत्येकं त्रिधा मन्त्रपाठः, एतावतैव च प्राणायामत्रयसिद्धिः ।

आदानं रोधमुत्सर्गो वायोस्त्रिस्त्रिः समभ्यसेत् ।

इति व्यासोक्तं पूरकादीनां प्रत्येकं त्रित्वं त्रिरावृत्तमन्त्रावच्छेदेन वा नानाप्रयोगापेक्षया वा । यद्वा पक्षान्तरमेवेदम् ।

त्रिविधं केचिदिच्छन्ति तथैव नवधा परे ।

---

(१) परिहृष्टो—इति क० पुस्तके ।

(२) स-इत्यादिः यत्रोभयाभाव—इत्यन्तो भागः ख० पुस्तके नास्ति ।

इति योगिनाऽप्यभिधानात् । परन्तु पूरकादीनां प्रत्येकमावृत्तिपक्षे एकैकमेकैकधा कृत्वा पुनस्तथैव कृत्वा पुनस्तथैव कुर्यादिति क्रमः । तत्र प्रथमं वामनासापुटेन पूरकं, अनन्तरं कुम्भकं, ततो दक्षिणनासापुटेन रेचकं, ततो दक्षिणनासापुटेन पूरकं, अनन्तरं कुम्भकं, (१)ततो वामनासापुटेन रेचकं, ततो दक्षिणनासापुटेन पूरकं, अनन्तरं कुम्भकं, ततो दक्षिणनासापुटेन रेचकमिति प्रकारः । तथा च छन्दोगाह्निकेऽप्युपाध्यायः-वामनासापुटेन शनैर्वायुमाकृष्य सर्वनाडीः पूरयन् नाभौ यथोक्तं विष्णुं ध्यायन् यथोक्तं जपं कुर्यादिति पूरकाख्यः प्राणायामः, ततो हृदि ब्रह्माणं ध्यायन् निश्चलश्वासो जपेदिति कुम्भकाख्यः, ततो दक्षिणनासापुटेन शनैर्वायुं रेचयन् ललाटे शिवं ध्यायन् जपेदिति रेचकाख्य इति । अभियुक्ताश्च—

ईडया कर्षयेद्वायुं बाह्यं षोडशमात्रया ।
धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया ॥
सुषुम्ना मध्यमं सम्यग्द्वात्रिंशन्मानतः शनैः ।
नाड्या पिङ्गलया चै(२)नं रेचयेद्योगवित्तमः ॥
येनैव सन्त्यजेत्तेन पूरयेद् धारयेत्ततः ।
रेच(३)येच्च ततोऽन्येन शनैरेवं पुनः पुनः ॥

तथा—

भूयो भूयः क्रमात्तस्य व्यत्यासेन समाचरेत् ।
प्राणायाममिमं(४) प्राहुर्योगशास्त्रविशारदाः ॥

इति । अत्र च प्राणायामगायत्रीजपे सर्वे जपधर्मा ग्राह्याः सामान्यशास्त्राऽनुरोधादित्यास्तां विस्तरः ॥ २३ ॥

(मिता०) प्राणायामविचारः—

गायत्रीमिति । गायत्रीं पूर्वोक्तामापोज्योतिरित्यादिना शिरसा संयुक्तां उक्तव्याहृतिपूर्विकां प्रतिव्याहृति प्रणवेन संयुक्तां ॐ भूः ॐ भुवः ॐ स्वरिति त्रीन्वारान्मुखनासिकासञ्चारिवायुं निरुन्धन् मनसा जपेदित्ययं सर्वत्र प्राणायामः ॥ २३ ॥

(१) ततो-इत्यारभ्य कुम्भकं,-इत्यन्तं ख० पुस्तकेऽधिकम् ।

(२) चैवं—इति ख० पुस्तके ।

(३) रेचयेच्च-इत्यारभ्य समाचरेत्-इत्यन्तं ख० पुस्तके नास्ति ।

(४) इमं-इत्यस्य स्थले इति-इति ख० पुस्तके पाठः ।

(वी० मि०) प्राणायामानन्तरं मार्जनकर्तव्यतायाः श्लोकार्द्धेन प्रदर्शनपूर्वकं सायंप्रातःसन्ध्ययोरेकेन श्लोकेन विशेषमाह—

प्राणानायम्य सम्प्रोक्ष्य तृचेनाऽब्दैवतेन तु ॥
जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् ॥ २४ ॥
सन्ध्यां प्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् ॥

प्राणानायम्येति यथाविधि प्राणायामं विधायेत्यर्थः । सम्प्रोक्ष्य=मार्जनं कृत्वा, तृचेन=ऋक्त्रयेण, अब्दैवतेन=जलदेवताकेन आपोहिष्ठेत्यादिना, सावित्रीम्=उक्ताम्, प्रत्यक्=पश्चिमाभिमुखः, जपन् सन्ध्यां=सायंसन्ध्यां अभिव्याप्य, कालाऽध्वनोरत्यन्तसंयोगे [पा० सू० २ । ३ । ५] द्वितीया । तदेव स्फुटयति—आतारकोदयात्=सम्यक् नक्षत्रदर्शनपर्यन्तम् ।

पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ।

इति मनुवचनात् । मर्यादामाङ् । आसीत=उपविशेत् । तेन सायंसन्ध्यायामुपविश्य नक्षत्रदर्शनावधि सावित्रीं जपेदिति विशेषो दर्शितः । अत्र जपधर्म आसीनत्वादिस्तदङ्गेऽङ्गन्यासादौ सर्वत्राऽन्वेति, अङ्गानां प्रधानरीत्यन्वयस्यौत्सर्गिकत्वात् । प्रातः=प्रातःसन्ध्यायां, प्राक्=प्राङ्मुखः, एवं प्राणायामादिपूर्वकं उक्तजपं कुर्वन् सूर्यदर्शनपर्यन्तं तिष्ठेत्=ऊर्ध्वः स्यात् । तेन प्रातःसन्ध्यायामुत्थित एव सावित्रीं जपेदिति विशेषो दर्शितः । सूर्याऽभिमुखत्वमूर्द्धता च ।

तिष्ठेच्चेद्वीक्षमाणोऽर्कं जपं कुर्यात्समाहितः ।

इति योगिवचनात् ।

तिष्ठेच्चेदोदयात्पूर्वां मध्यमामपि शक्तितः ।
आसीतोड्डमाच्चाऽन्त्यां सन्ध्यां पूर्वत्रिकं जपन् ॥

इति छन्दोगपरिशिष्टात् । अत्र शक्तित इत्यनेन मध्याह्ने 'सहस्रपरमां देवी'मित्याद्युक्तसङ्ख्यकैर्यथासामर्थ्यं कृतैरेव जपैः सन्ध्योपासनसमाप्तिमभिप्रैति ।

नन्वेतद्वचनस्य सन्ध्यात्रयसाधारण्यात्प्रातःसायंसन्ध्ययोरप्येवमिति चेत्सत्यं, परन्तु फलविशेषार्थितायां तत्राऽवध्यन्तरोक्तिः । तथा च मनुः—

ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन्।
प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च॥

यशो=जीवितस्य(१) ख्यातिः, कीर्तिस्तु मृतस्य सेति व्याख्यातारः। अत्र दीर्घायुरादिकं गुणफलमित्युपाध्यायाः। वाक्यान्तरेऽपि सूर्यनक्षत्रदर्शनयोरेवाऽवधित्वं फलार्थं मूलक्याऽनुरोधात्। अथवा सूर्यनक्षत्रदर्शनयोः प्राक्कालोऽप्यनेन नित्यजपाङ्गतया बोध्यते, न तु जपेन कालस्याऽभिव्याप्तावपि तात्पर्यम्। एवञ्च सन्ध्यात्रयेऽपि नित्यजपे उक्तैव व्यवस्था, काम्यजपे तु प्रातः सायं च सूर्यनक्षत्रयोरुत्तरावधित्वम्। एतच्च यदि तद्द्वयाऽवधिजपस्य सहस्रजपादधिकसङ्ख्यत्वसम्भवः। वस्तुतस्तु तदसम्भवात्सर्वत्र सहस्रजपेनैव सन्ध्याया दीर्घत्वम्। एवञ्च मध्याह्नसन्ध्यायामपि तदभ्यूहम्। जपे च सहस्रसङ्ख्या क्रतुपुरुषोभयार्था। 'खादिरं वीर्यकामस्ये'त्यत्र यूपे खादिरत्ववत्।

गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम्। इति।
गायत्रीम(२)भ्यसेत्तावद्यावन्नक्षत्रदर्शनम्॥

इति वचनयोरप्युक्तसङ्ख्यायामेव तात्पर्यम्। किं बहुना प्रकृतवचनमप्यनयैव दिशा प्रस्थाप्यताम्। अथवा एवंविधानि सर्वाणि वचनानि सन्ध्यासमयचरमसीमप्रदर्शनपरतयैव वर्ण्यताम्। ननु—

सन्धौ सन्ध्यामुपासीत नाऽस्तगे नोद्गते रवौ।

इति योगिसंहितायां सन्ध्यावन्दनस्य दिनरात्रिसन्धिरूपसन्ध्याकालकर्त्तव्यत्वस्थितौ कियान् सन्धिरित्यपेक्षायाम्—

ह्रासवृद्धी तु सततं दिनरात्र्योर्यथाक्रमम्।
सन्ध्या मुहूर्त्तमात्रं तु ह्रासे वृद्धौ समा स्मृता॥

इति वचनात्सन्ध्याकालस्य दण्डद्वयात्मकत्वे निर्व्यूढे 'समं स्यादश्रुतत्वात्' इति न्यायाद्रात्रेश्चरमो दण्डो दिवसस्य प्रथमः प्रातःसन्ध्या, दिवसस्य चरमो रात्रेः प्रथमो दण्डः सायंसन्ध्येति पर्यवसानात्कथं सूर्यनक्षत्रदर्शनयोः सन्ध्यासमयोत्तरावधित्वमव्यापनादधिकव्यापनाच्चेति चेत् मैवं, वाचनिकेऽर्थे न्यायाऽनवकाशात्। यदाह मिहिराचार्यः—

(१) जीवितः सन्-इति क० ख० पुस्तकयोः पाठः।
(२) इदं पद्यार्धं ख० पुस्तके नास्ति।

अर्द्धाऽस्तसमयात्सन्ध्या व्यक्तीभूता न तारका यावत् ।
तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत् ॥

एवञ्चाऽविद्यमानार्द्धाधिकमार्तण्डमण्डलः स्पष्टलक्ष्यनक्षत्रगणः कालविशेषः सन्ध्येति सन्ध्ययोः सामान्यलक्षणम् । तथा हि अस्तमितेऽपि सूर्ये कियन्ति हि तस्य तेजांसि मुहूर्त्तमनुवर्तन्तेऽनुदितेऽपि(१) तस्मिन् कियन्ति चित्प्रवर्तन्ते, तानि चोभयरूपाण्यपि तारकातेजः पराभवन्तीति वस्तुस्थितिः । तेन प्रातःसन्ध्यायाः सौरकिरणप्रयुक्ततारकातेजोऽभिभव(२)प्रवृत्तिः । यत्तु (३)सन्ध्या पूर्वोऽवधिः, सूर्यबिम्बार्द्धोदयस्तूत्तरः, सायंसन्ध्यायास्तु सूर्यबिम्बार्द्धाऽस्तमयः पूर्वोऽवधिः, सौरकिरणप्रयुक्ततारकातेजोऽभिभवनिवृत्तिस्तूत्तरः । यत्तु सन्ध्या च रात्रेर्भागाऽवशेषः इति (४)प्रामाणिकलिखनं, तत् शास्त्रे क्वचित् क्वचित् सन्ध्यारात्र्योः पृथक्कथनोपपत्तये । परिभाषाविशेषमाश्रित्य प्रायिकव्यवहारानुसारेण त्वस्मिन् द्वीपे सूर्यमडलवान् कालोऽस्मिन् दिनं तद्रहितश्च रात्रिरिति लक्षणं दिनरात्र्युभयान्तर्गतैव सन्ध्या । परन्तूक्तसन्ध्याद्वयसामान्याऽनुसारेण सन्ध्याया भूयान् भागो विभावर्यामन्तर्भवति, स्तोकस्तु दिवस इति विशेषः, इत्युपपन्नं सूर्यबिम्बार्द्धस्पष्टनक्षत्रमात्रयोः प्रातः(५)सायंसन्ध्योत्तरावधित्वं सन्ध्यात्रयसाधारणम् । तल्लक्षणन्तु—

त्रयाणां चैव देवानां ब्रह्मादीनां समागमः ।
सन्धिः सर्वसुराणां च सन्ध्या तेन प्रकीर्तिता ॥

इति योगिनोक्तं पृथगेव । इदमत्राऽवधेयं मध्याह्नसन्ध्यायां न(६) दण्डद्वयात्मकत्वनियमो मानाऽभावात् ।

न च सन्ध्या मुहूर्त्तमात्रं त्वित्य(७)विशेषितसन्ध्योपादानमेव

(१) अपि-इति क० पुस्तके नास्ति ।
(२) निवृत्तिः-इति पाठान्तरम् ।
(३) यत्तु सन्ध्या-इति क० पुस्तके नास्ति ।
(४) प्रामाणिक-इत्यारभ्य परिभाषाविशेष-इत्यन्तो भागः ख० पुस्तके नास्ति ।
(५) प्रातः-इति ख० पुस्तके नास्ति ।
(६) न-इति ख० पुस्तके नास्ति ।
(७) त्विति विशेषित०-एवं ख० पुस्तके पाठः ।

मानमनध्यवसायात् । न च स्मृतिषु मध्यान्हे सन्ध्यावन्दनकर्त्तव्यताया विहितत्वात् द्वितीययामस्याऽन्त्यो दण्डस्तृतीयस्य च प्रथम इति दण्डद्वयात्मिकाऽभिजित्कालरूपा मध्याह्नसन्ध्येति वाच्यम्, मध्याह्नशब्देन त्रिधा विभक्तदिनस्य मध्यमभागाऽभिधानात् । अष्टधाविभक्तदिनपञ्चमभागस्य संविभागेन तदव्यवहितपूर्वकालस्य च सन्ध्यावन्दनोत्तरसंविभागपूर्वं कर्त्तव्यकर्मकलापेनाऽक्रान्तत्वात् ।

तिसृष्वपि च सन्ध्यासु स्नातव्यं च तपस्विभिः ।

इत्यादौ तत्पूर्वकालस्याऽपि सन्ध्यात्वावसायाच्च । तस्मात्प्रातः-सायंसन्ध्याऽनवच्छिन्नो दिनभागः सम्पूर्णमेव वा दिनं मध्याह्नसन्ध्याशब्दार्थः, अनन्यगतेः । मध्याह्न उदये वाऽपि, इत्यादिशास्त्रव्याकोपादत्यावश्यकप्रकरणे—

मुखसंशोधनं प्रातः सन्ध्याऽह्नि स्नानपूर्विका ।
सन्ध्याऽथ पञ्चयज्ञान्ते भोजनं लीलया स्थितिः ॥
सायंसन्ध्याऽशनं वेदपाठोष्य(१)शयनं भवेत् ।
एतावदपि कर्त्तव्यं श्रेयःपरमभीरुभिः ॥

इति अहनि स्नात्वा पञ्चमहायज्ञान्निर्वर्त्येत्यादिप्रामाणिकनिबन्धलिखनादाचारानुसाराच्च । इयांस्तु विशेषः—सति सम्भवेऽष्टधाविभक्तदिनचतुर्थभागे(२)निषिद्धवेलायां क्रमेण स्नानं तत्प्रतिनिधिं वा विधायाऽव्यवधानेन सन्ध्यावन्दनानिमित्तविशेषेण तु क्वचिदप्यहर्भागे निषिद्धवेलायां क्रमेण स्नान(३)सन्ध्यादिकमिति कृतं प्रसक्तानुप्रसक्तया । स्यादेतेन भवतूक्तं स्नानसन्ध्यालक्षणं समयस्वरूपम् । तथाऽपि सहस्रजपेन तदुल्लङ्घने ध्रौव्यात् ।

सन्धौ सन्ध्यामुपासीत नाऽस्तगे नोद्गते रवौ ।

इति वचनविरोध, इति मैवं—

प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम् ॥

---

(१) पादोष्वशयनं इति ख० पुस्तके पाठः ।
(२) निषिद्धवेलायां क्रमेण—इति क० पुस्तके नास्ति ।
(३) स्नानेत्यादि भवतूक्त,मित्यन्तं क० पुस्तके नास्ति ।

इति संवर्त्तवाक्य इव प्रकृतेऽप्युपासीतेत्यस्य उपासीतेति विधिः। उपासीतेत्यस्य उपासितुमारभेतेत्यर्थात् तेन सन्ध्याऽप्युक्तदण्डद्वयात्मके काले सन्ध्यामुपासीतेति विधिः। अर्थवैषम्येऽप्यनुषङ्गे दोषाभावात् उपासितुमारभेतेत्युक्त्वा। 'सायं रवावदृश्ये प्रातर्दृश्ये च नारभेते'ति निषेधश्च प्रकृतवचनार्थः। प्रातःसन्ध्यां सनक्षत्रां सम्यग्विभावनीयामथ पश्चिमां सन्ध्यां सादित्यां सम्पूर्णादित्यां तदसंभवेऽर्द्धास्तमितभास्करां उपासितुमारभेतेति संवर्त्त(१)वचनार्थः। न च निरुक्तस्वरूपायाः सन्ध्यायाः प्रकृतविशेषणद्वयात्सामानाधिकरण्याऽनुपपत्तिः, तादृङ्नक्षत्रादित्याभ्यामव्यवहितोत्तरस्वरूपस्य सादित्यत्वोपपन्नमात्रयोः(२) सन्ध्ययोः सम्भवात्। अयं त्ववान्तरविशेषो यत् 'सविशेषणे ही'ति न्यायेन सन्ध्याव्यवधानविशिष्टौ नक्षत्रादित्यौ विशेष्यान्वयस्यौत्सर्गिकत्वादुक्तनक्षत्रादित्याऽव्यवधानविशिष्टा सन्ध्यैव वाऽऽरम्भे बीजमिति। तत्र सति सम्भवे प्रथमः कल्पः, अन्यथा द्वितीयः, यदाह बौधायनः। अपि चाऽत्र प्रजापतिगीतौ श्लोकावुदाहरन्ति।

> अनागतां तु ये पूर्वामतिक्रान्तां तु पश्चिमाम्।
> सन्ध्यां नोपासते विप्राः कथन्ते ब्राह्मणाः स्मृताः॥
> सायं प्रातः सदा सन्ध्या न ये विप्रा उपासते।
> तानेतान् धार्मिको राजा शूद्रकर्मसु योजयेत्॥

शातातपोऽपि—

> अनागतां तु यः पूर्वां सादित्यां चैव पश्चिमाम्।
> नोपासीत द्विजः सन्ध्यां स धृष्टो ब्राह्मणः स्मृतः॥

केचित्तु सनक्षत्रां दृश्यविद्यमानसकलनक्षत्रां प्रवृत्तसूर्यकिरणामिति शेषः। तेनाऽदृश्याकिञ्चिन्नक्षत्रस्याऽपि सन्ध्याऽव्यवहितपूर्वस्याऽपि समयस्य व्यवच्छेदः। सादित्यां=दृश्यसूर्यां, अर्द्धेत्यादि=अदृश्यसूर्यार्द्धां, तेन दृश्यसम्पूर्णसूर्यस्याऽदृश्यसम्पूर्णसूर्यस्य च समयस्य व्यवच्छेदः। तेन सन्ध्यायाः समारम्भो न तत्पूर्वमपीति व्याचक्ष-

---

(१) संवर्त्त इति ख० पुस्तके नास्ति।

(२) साहित्योत्पन्नमात्रयोः—इति क० पुस्तके, सादित्यस्योपपन्नमात्रयोः—इति ख० पुस्तके पाठः।

भोःशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभि(१)वादने।

एवञ्च व्यत्य(२)स्तहस्ताभ्या(३)मभिवाद्यस्य पादौ गृहीत्वा 'अमुकशर्माऽहमस्मि भो गुरो!' इति अभिवादनं पर्यवस्यति। अभिवाद्येन च प्रत्यभिवादनं कार्यम्। तदाह स एव—

आयुष्मान् भव सौम्यति विप्रो वाच्योऽभिवादने।
अकारश्चाऽस्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरप्लुतः॥

(४)अस्य अभिवादकस्य नाम्नोऽन्ते अकार इति नामान्तस्वरोपलक्षणम्। 'आमन्त्रिते स्वरोऽन्त्यः प्लुवत' इति वसिष्ठात्। तेनाऽभिवादकनामाऽन्त्यस्वरः पूर्वाक्षरप्लुतः। पूर्वमक्षरं व्यञ्जनरूपं यस्य सः पूर्वाक्षरश्चासौ प्लुतश्चेति कर्मधारयः। प्लुतस्त्रिमात्रः पूर्वाक्षरेति(५)विशेषणाद्व्यञ्जनसहित एव स्वरः प्लावनीय इति पर्यवस्यति। एवञ्च 'आयुष्मान् भव सौम्य(६)देवदत्ता' इति प्रत्यभिवादनं सिद्ध्यति(७)। अत्र मनुः—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्।
नाऽभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥

इत्यादि संक्षेपः॥ २५॥

(मिता०) अग्निकार्यमिति। ततः सन्ध्योपासनानन्तरं द्वयोः सन्ध्ययोरग्निकार्यं अग्नौ कार्यं समित्प्रक्षेपादि यत्तत्कुर्यात् स्वगृह्योक्तेन विधिना॥ २५॥

(मिता०) तत इति। तदनन्तरं वृद्धान् गुरुप्रभृतीनभिवादयेत्। कथम्। असौ देवदत्तशर्माऽहमिति स्वं नाम कीर्तयन्॥

(वी० मि०)

गुरुं चैवाऽप्युपासीत स्वाध्यायार्थं समाहितः॥ २६॥

---

(१) अभिवादनैः-इति क० पुस्तके पाठः।
(२) व्यस्तहस्ताभ्यां-इति ख० पुस्तके पाठः।
(३) अभिवाद्यस्येत्यारभ्य गुरो!-इत्यन्तं ख० पुस्तके नास्ति।
(४) पूर्वमक्षर-इति ख० पुस्तकेऽधिकम्।
(५) पूर्वाक्षरेण-इति क० पुस्तके पाठः।
(६) सौम्य-इति ख० पुस्तकेऽधिकः पाठः।
(७) सिद्ध्यति-इत्यारभ्य प्रत्यभिवादनम्-इत्यन्तो ग्रन्थः ख० पुस्तके नास्ति।

गुरुं=वक्ष्यमाणलक्षणम्। चस्त्वर्थः। गुरुमेव त्विति सम्बन्धः। समानार्थ(१)पत्यु(!)समुदायश्च समुदायार्थमेवाऽभिधत्ते,अपि चेत्यादौ बहुशस्तथा दर्शनात्। अपिर्भिन्नक्रमः। तेन गुरुन्तु स्वाध्यायो वेदा(२)ध्ययनं, तदर्थमुपासीत परिचरेदपि। न केवलमभिवादयेदे-वेत्यर्थः। समाहितः=तदेकाग्रमनाः॥ २६॥

(वी० मि०)

आहूतश्चाऽप्यधीयीत लब्धं चाऽस्मै(३) निवेदयेत्॥

आहूतः=आकारितो गुरुणा प्रक्रमात्, न तु स्वयं गुरुं प्रेरयेत्। चकारात्तदनुष्टानादिकं समुच्चिनोति। तथा च गौतमः—'अनुज्ञात उपविशे(४)द्दक्षिणतः प्राङ्मुखः शिष्य उदङ्मुखो वा अधीयीताऽपि न केवलं उपासीतैवे'ति। लब्धं भिक्षादि सर्वं अस्मै गुरवे निवेदयेत् दद्यात् इति यावत्। इदं मया लब्धमिति प्रकाशयेदित्यर्थः-इति साम्प्रदायिकाः॥

(वी० मि०)

हितं चाऽस्य(५) चरेन्नित्यं मनोवाक्कायकर्मभिः॥२७॥

हितं तदन्ववाययोर्विशुद्धमनुकूलम्। अस्य=गुरोः। नि-त्यं=तत्तदवसराऽनतिक्रमे(६)। मानसवाचिककायिकैर्व्यापारैः कुर्यादित्यर्थः। चकारात्—

शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च।
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम्॥
नित्यमुद्धृतपाणिः स्यात्साध्वाचारः सुसंयतः।
आस्यतामिति चोक्तः सन्नासीताऽभिमुखं गुरोः॥

इति आदिमन्वाद्युक्तं समुच्चीयते॥ २७॥

(मिता०) गुरुमित्यादि। तथा गुरुं वक्ष्यमाणलक्षणमुपासीत

(१) समानार्थपत्युसमुदायश्च-इत्यस्य स्थले समानार्थंव्यय-इति ख० पुस्तके पाठः।

(२) वेदाध्ययं-इति क० पुस्तके, वेदाध्ययं-इति च ख० पुस्तके पाठः।

(३) लब्धं तस्मै इति ख०। (४) उपविशेत-इति ख० पुस्तके पाठः।

(५) हितं तस्याऽऽचरेन्नित्यं-इति मुद्रितपुस्तके पाठः।

(६) अनतिक्रमेण-इति ख० पुस्तके पाठः।

तत्परिचर्यापरस्तदधीनस्तिष्ठेत्। स्वाध्यायार्थमध्ययनसिद्धये समाहितोऽविक्षिप्तचित्तो भवेत्। आहूतश्चाऽप्यधीयीत गुर्वाहूत एवाऽधीयीत न स्वयं गुरुं प्रेरयेत्। यच्च लब्धं तत्सर्वं गुरवे निवेदयेत्। तथा तस्य गुरोर्हितमाचरेत्। नित्यं सदा। मनोवाक्कायकर्मभिः न प्रतिकूलं कुर्यात् । अपिशब्दाद्गुरुदर्शने गौतमोक्तं कण्ठप्रावृतादि वर्जयेत् ॥ २६ ॥ २७ ॥

(वी० मि०) प्रसङ्गाद् गुरोरध्याप्यानाह—

कृतज्ञाद्रोहिमेधाविशुचि(१)कुल्याऽनसूयकाः ॥
अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः ॥ २८ ॥

कृतज्ञः=उपकाराविस्मरणशीलः । अद्रोही=परहिंसापराङ्मुखः। मेधावी=ग्रन्थग्रहणधारणप्रवणधीमान् । कुल्यो=ज्ञातिः । अनसूयकः=असूयारहितः, परगुणाविष्करणतद्दोषानाविष्करणशील इति यावत्। साधुः=सच्चरितः। शक्तः=शुश्रूषाकरणसमर्थः । आप्तो=बन्धुरवि(२)प्रलम्भको वा । ज्ञानदो=विद्यान्तरदाता । वित्तदो ऽध्ययनपणबन्धं विना गुरवेऽर्थदाता । एते धर्मतो धर्मशास्त्रानुसारेणाऽध्यापनीयाः । कुल्येत्यत्र कल्पेति क्वचित्पाठः । तत्र कल्पः=आधिव्याधिरहितः। क्वचित्कल्याणसूचकः इति पाठः । तत्र (३)कल्याणसूचकः= शुभलक्षणः ।

अध्याप्याः साधुशक्ताप्ताः स्वार्थदा धर्मतस्त्विमे ।

इति क्वचित्पाठः । तत्र स्वो=जातिः । अर्थदो=गुर्वर्थप्रदाता । अत्रैव मनुः—

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्मतः ॥ २८ ॥

(मिता०) अध्याप्यानाह—

कृतज्ञेति। कृतमुपकारं न विस्मरतीति कृतज्ञः। अद्रोही दयावान्। मेधावी ग्रन्थग्रहणधारणशक्तः । शुचिर्बाह्याभ्यन्तरशौचवान्। कल्प

(१) शुचिकल्याऽनसूयकाः—इति मुद्रित पुस्तके पाठः ।
(२) बन्धुरहितविप्रलम्भकः इति ख० पुस्तके पाठः ।
(३) तत्र-इति क० पुस्तके नास्ति ।

आधिव्याधिरहितः। अनसूयको दोपानाविष्का(१)रेण गुणाविष्करणशीलः । साधुर्वृत्तवान् । शक्तः शुश्रूपायाम् । आप्तो बन्धुः । ज्ञानदो विद्याप्रदः । वित्तदोऽप(२)णपूर्वकमर्थप्रदाता । एते गुणाः समस्ता व्यस्ताश्च यथासम्भवं द्रष्टव्याः । एते च धर्मतः शास्त्रानुसारेणाऽध्याप्याः ॥ २८ ॥

(वी० मि०) उपनीतं प्रत्याह—

दण्डाजिनोपवीतानि मेखलां चैव धारयेत् ॥

दण्डो=यष्टिश्च अजिनं=चर्म च उपवीतं यज्ञसूत्रं च तानि । मेख-२ लां=रशनां च धारयेत् । ब्रह्मचारीति शेषः । अत्र विशेषमाह मनुः—

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः ।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥
मौञ्जी त्रिवृत्समा सा श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य क्षणतान्तवी ॥
मुञ्जाभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः ।
त्रिवृता ग्रन्थिनै(३)केन त्रिभिः पञ्चभिरेव वा ॥
कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत् ।
शाणसूत्रमयं राज्ञो वैश्यस्याऽऽविकसूत्रिकम् ॥
ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥
केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ।
ललाटसंमितो राज्ञः स्यात्तु नासान्तिको विशः ॥
ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः ।
अनुद्वेगकरा नृणां सत्वचो नाऽग्निदूपिताः ॥

कृष्णाया इदं कार्ष्णं, कृष्णा=एणी । रुरोरिदं रौरवं; रुरुर्गौरमृगः, झपाव(४) इति प्रसिद्धः । वस्तस्येदं वास्तं, वस्तः=छागः । आनुपूर्वेण ब्राह्मणक्षत्रियवैश्या(५)यथासङ्ख्यमित्यर्थः । एतानि चोत्तरीयाणि । तथा च स्मृतिः—

(१) नाविष्करणेन ख० । (२) पयो येतनभाषावन्धस्तद्राहितं; अर्पणपूर्वकं ख० ग० ।
(३) ग्रन्थ्यैनकेन-इति क० पुस्तके पाठः ।
(४) पाव-इति ख० पुस्तके पाठः (५) कार्ष्ण्यम्-इति ख० पुस्तके ऽधिकम् ।

उत्तरीयं समाख्यातं वासः कृष्णाजिनं शुभम् ।

पारस्करगृह्यमपि-'ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य रौरवं राजन्यस्याऽऽजं गव्यं वा वैश्यस्य'। एणी=कृष्णसारहरि(१)णी तस्या इदमैणेयम्। 'स्त्रीभ्यो ढक्' [पा० सू० ४ । १ । १२०] इति पाणिनिस्मृतेः ।

ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु ।

इति अमरसिंहः । एणस्येदमैणेयमिति भाष्यलिपिः प्रमादात् । न च 'एणः कृष्णमृगः स्मृतः' इति तद्व्याख्यायककात्यायनवचनादार्ष एवाऽयं प्रयोग इति वाच्यम्, तस्य स्त्रीप्रत्ययप्रकृत्येणशब्दव्याख्यामात्रत्वात् । आर्षत्वाश्रयणे मानाभावात् । स्मृतिः—

मेखला सप्तहस्ता स्यादजिनञ्च(२)द्विहस्तकम् ।
बहिर्लोम त्र्यङ्गुलं च खण्डं वाऽथ त्रिखण्डकम् ॥

चतुर्विंशाष्टषोडशाङ्गुलैः खण्डानि कारयेत् । विकल्पः शक्त्यपेक्षया कुलाचारापेक्षया वा । 'सर्वेषां रौरवाऽजिन'मिति यमोक्तं कार्ष्णाद्यसम्भवे इति । 'शाणक्षौमाविकानी'ति, शणः=स्तम्बलिः, क्षुमाऽतसी, अविर्मेषः, तदीयानि यथाक्रमं ब्राह्मणादयो ऽधरीयाणि वसीरन्नित्यर्थः । 'क्षौमं शाणं वा वसनं ब्राह्मणस्य, कार्पासं क्षत्रियस्याऽऽविकं वैश्यस्य' इति गोभिलोक्तं पक्षान्तरम् । तथा 'अलाभे सर्वाणि सर्वेषाम्'। अलाभे तु मुख्यस्य, सर्वाणि क्षौमादीनि सर्वेषां ब्राह्मणादीनाम् । तत्रैव वसिष्ठः-'सर्वेषां तान्तवमरक्तम्'। गौतमः-'सर्वेषां कार्पासमविकृतम्'। काषायमप्येके इति संक्षेपः ।

अथ मेखला। मौञ्जी त्रिवृदित्यादि । मौञ्जी=मुञ्जभवा, त्रिवृत्=नवगुणीकृता, श्लक्ष्णा=मसृणस्पर्शा, मूर्वा=लताविशेषः, त्वधमरु!(३)रतिप्रसिद्धः । तन्निर्मिता मौर्वी, ज्या=धनुर्गुणः, तथाभूताया एव मौर्व्या मेखलायां विनियोगः । अश्मन्तकः=कुशसदृशस्तृणविशेषः । बल्वजः=सारय ! इति प्रसिद्धः । त्रिवृतेत्यादि चतस्रस्तृतीयाः इत्थम्भूतलक्षणे । तेन त्रिरावृ(४)ता गुणरज्वा वर्त्तनत्रयेण त्रिसरपर्य(५) वसितेन एकेन च ग्रन्थिना त्रिभिः पञ्चभिर्वा भ्रामणैर्लक्षितेन लक्षिता मेखला कार्येत्यन्वयः । भ्रामणे प्रवरसाम्येन व्यवस्थितो विकल्पः ।

---

(१) मृगी-इति ख० पुस्तके पाठः । (२) तु-इति ख० पुस्तके पाठः ।

(३) त्वग्धमरु इति प्रसिद्धः-इति ख० पुस्तके पाठः ।

(४) त्रिवृत्त्या-इति ख० पुस्तके पाठः । (५) त्रिसरपर्यन्तवसितेन-इति क० पुस्तके पाठः ।

अथोपवीतम् । 'कार्पासमुपवीतं स्या'दित्यादि । विप्रस्य कार्पासं, राज्ञः शणसूत्रमयं, वैश्यस्य मेषलोम(१)निर्मितमुपवीतमित्यर्थः । उपवीतस्वरूपमाह त्रिवृतनवगुणम् । 'नव वै त्रिवृदि'ति श्रुतेः । तेन नवतन्तव उपवीतमिति लभ्यते । अत एव देवलः—

यज्ञोपवीतं कुरुत(२)सूत्राणि नव तन्तवः ।

नवेति उपवीतप्रकृतिभूतसूत्रसङ्ख्याकथनम् । सूत्राणीति वैकल्पिकक्षौमादिसूत्रबहुत्वापेक्षया बहुवचनम्, न केवलं नवतन्तुसमुदाय एवोपवीतमित्यभिप्रेरयन्(३) विशिनष्टि—ऊर्ध्ववृतमिति । उपलक्षणमेतत् । तथा च संयोगपरिशिष्टम्—

ऊर्ध्वन्तु त्रिवृतं कार्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥

अत्र टीका—वामावर्त(४)वलितं सूत्रमयं त्रिगुणीकृत्य दक्षिणावर्तवालितं च कार्यं, तेन न तन्तवः सम्पद्यन्ते, तदेव त्रिसरमुपवीतं स्यात्तस्य च त्रिकस्यैको ग्रन्थिरिति । एवञ्च यद्यपि कर्त्तक(५)सौकर्यार्थमेव तन्त्ववयविनं भङ्क्त्वा त्रिगुणीकृत्याऽधोमुखं वर्त्तयित्वा पुनस्त्रिगुणीकृत्योदूर्ध्वमुखं वर्तयति, तथाऽपि ग्रन्थिपातनानन्तरं नवसङ्ख्यासिद्धये नवगुणं(६)सूत्रमुभयश्छिन्दन्ति । उपनयनकालीनोपवीते तु तदकरणं प्रमादादाचारानुसाराद्वेति स्मर्तव्यम् । ग्रन्थौ च त्रिपञ्चप्रवरापेक्षया त्रिपञ्चवारान् त्रिवृतां रज्जुमावर्तयन्ति । मनुना मेखलाया तदभिधानादेकत्र निर्णीत इति न्यायादिति । तत्र भ्रमिर्दक्षिणावर्त्तेन तस्यौत्सर्गिकत्वात् ।

न च प्रकृतिभूततन्तूनां नवसङ्ख्यत्वे 'कार्पासमुपवीतं स्यात् षट्त्रिवृतं ब्राह्मणस्ये'ति पैठीनसिविरोधः । नवगुणस्य त्रिसरत्वे एकेन ग्रन्थिना 'तन्तुर्द्विगुणस्त्रिगुणोऽपि वे'ति देवलीयद्विगुणत्वोक्तिविरोधश्चेति वाच्यम्, 'नवानां तन्तूनामसम्भवे षट्कस्य, त्रिसरत्वासम्भवे द्विसरत्वस्याऽऽश्रयणा'(७)दिति दैर्घ्यछन्दोगपरिशिष्टे ।

---

(१) सूत्र-इति क० पुस्तके अधिकः पाठः । (२) कुरुत-इति क० पुस्तके नास्ति ।
(३) इत्यभिप्रायेण-इति ख० पुस्तके पाठः ।
(४) वलितं-इत्यस्य स्थाने 'मर्लाक' इति ख० पुस्तके पाठः ।
(५) कर्तन-इति ख० पुस्तके पाठः ।
(६) सूर्य-इति क० पुस्तके पाठः । (७) अभ्रवणात्-इति क० पुस्तके पाठः ।

पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।
तद्धार्यमुपवीतं स्यात् नाऽतिलम्बं न चोच्छ्रितम् ॥

वामस्कन्धे कृतं नाभिपृष्ठवंशयोर्धृतं यथा कटिपर्यन्तं प्राप्नोति तावत्परिमाणमुपवीतं धार्यं न ततो दीर्घं ह्रस्वं चेत्यर्थः ।

अथ 'कौशं सौत्रं वा त्रिस्त्रिवृद्यज्ञोपवीतमानाभेर्दक्षिणं बाहुमुद्धृत्य सव्यमवधाय शिरोऽत्र दध्यात्, विपरीतं पितृभ्यः, कण्ठेऽवसक्तं निवीत, मधोऽवसक्तमधोवीतम्,' इति बौधायनः । कौशं पट्टं त्रसरादिनिर्मितं, आनाभेः=नाभिप्राप्तम् । निगमपरिशिष्टम्–'वामस्कन्धे यज्ञोपवीतं दैवे प्राचीनावीतमितरथा (१)वामेतरस्कन्धे नाभ्या'मिति । नाभिप्राप्तमित्यर्थः । देवलः–उपवीतमधिकृत्य ।

स्तनादूर्ध्वमधोनाभेर्न कर्त्तव्यं कदाचन ।

स्कन्धे प्रवेशितं यज्ञोपवीतं यत्स्तनादूर्ध्वमवतिष्ठते नत्वधो लम्बते, यच्च नाभिमति(२)क्रम्याऽधो याति तन्न धार्य्यतामित्यर्थः । एषु वचनेषु नाभ्यधोगामिनो यज्ञोपवीतस्य कण्ठतोऽर्थतो(३) वा व्युदासात्कथमेवमिति चेन्न, एतेषां वचनानां माध्यन्दिनीयगोभिलीयाद्यतिरिक्तशाखाविषयत्वात् । आचारोऽपि शिष्टानां कर्मप्रदीपाऽनुसारेणैवेति नाऽधिकमत्राऽभिनिविश्यते । अत्र ब्रह्मचारिणामेकमुपवीतं स्नातकानान्तु द्वे इति नियमः । तथा हि मनुवसिष्ठौ,—

स्नातकानां हि नित्यं स्यादन्तर्वासस्तथोत्तरम् ।
द्वे चोपवीते यष्टिश्च सोदकश्च कमण्डलुः ॥

तदिदमुपवीतं प्राङ्मुख उदङ्मुखो वा परिदध्यात् दैव(४)त्वात् । अत्र यज्ञोपवीतमिति मन्त्रस्य विश्वेदेवा ऋषयस्त्रिष्टुप् छन्दो यज्ञोपवीतं देवता ग्रहणे विनियोगः इति ऋष्यादिस्मरणमपि केचिदिच्छन्ति, मन्त्रं च त्रिः पठन्ति । मन्त्रस्तु वाजसनेयिनां 'यज्ञोपवीतं परमं पवित्र' मित्यादिः । छन्दोगानां 'यज्ञोपवीतमसी'त्यादिः ।

धारणप्रकारमाह गोभिलः–'दक्षिण बाहुमुद्धृत्य शिरोवधाय सव्येंऽसे प्रतिष्ठापयति स(५) दक्षिणं कक्षमन्ववलम्बं भवत्येवं (६)प्रा-

---

(१) वामेतर'–इत्यारभ्य 'अधिकृत्य'–इत्यन्तस्य ग्रन्थस्य स्थाने–'पितृयज्ञे नाभ्यां दैव' इति पितृमनुष्यकार्यातिरिक्तसकलवैदिककर्मोपलक्षणमित्युपाध्यायाः इति ख० पुस्तके पाठान्तरम् ।

(२) अधिक्रम्य–इति क० पुस्तके पाठः । (३) कण्ठतोऽर्थस्य वा–इति ख० पुस्तके पाठः ।

(४) दैवतत्वात्–इति क० पुस्तके पाठः । (५) स इति ख० पुस्तके नास्ति ।

(६) यज्ञोपवीती–इति ख० पुस्तके पाठान्तम् ।

चीनावीती भवति सव्यं बाहुमुद्धृत्य शिरोवधाय दक्षिणेऽसे (१)प्रतिष्ठापयसि सव्यं कक्षमन्ववलम्बं भवत्येवं प्राचीनावीती (२)भवति' । निगमपरिशिष्टम्—'द्विकण्ठावसक्तम्', कण्ठपार्श्वद्वयं लग्नम् । छन्दोगपरिशिष्टम्—

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

अत्र पूर्वार्द्धेनोपवीतित्वादेः पुरुषार्थत्वमुत्तरार्द्धेन क्रत्वर्थत्वमभिप्रेतमतो नाऽन्यतरवैयर्थ्यं यद्वैदिकं कर्म न कृतम् । न फलसाधकं वैगुण्यादित्यर्थः । उपवीतिनेति सामान्यशब्देन प्राचीनावीतनिवीतयोरपि परिग्रहः, तेन श्राद्धकाले प्राचीनावीतित्वादावस्थायामपि न पुरुषार्थोपवीतित्वबाधः । न च—

'उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ।
प्राचीनावीतमन्यस्मिन् निवीतं कण्ठलम्बितम्' ॥

इत्यनुशासनादुपवीतपदस्य स्कन्धविन्यासविशेषविशिष्टसूत्रसमुदायविशेषवाचकत्वात्कथमेवमिति वाच्यं, भूयः प्रयोगबलेन स्कन्धे विन्यासशून्येऽपि सूत्रसमुदायविशेषे सामान्यत एवोपवीतिपदस्य शक्तिस्थैर्यात् । अत एवोपवीतदानविधयोऽपि निःप्रत्यूहाः । अन्यथा स्कन्धविन्यासविशिष्टस्यादानात्तदनुपपत्तेः । अत एव च—

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृहीतान्यानि मन्त्रतः ॥

इति मनुना परिहितेऽपि सूत्रसमुदाय एवोपवीतपदप्रयोगः सङ्गच्छते । सङ्गच्छते च 'यज्ञोपवीतं परमं पवित्र'मित्यादि मन्त्रेऽपि तादृशयज्ञोपवीतपदप्रयोगः । किञ्च—

ऊर्ध्वं तु त्रिवृतं कार्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥

इत्युपवीतपदार्थव्युत्पादकछन्दोगपरिशिष्टवचनात्सामान्यशक्तिरप्रत्यूहेति ।

न चोपवीतपदस्य सूत्रसमुदायविशेषसामान्यवचनत्वे उपवी-

---

(१) सव्ये-इति क० पुस्तके पाठः ।

(२) यज्ञोपवीती-इति ख० पुस्तके पाठः ।

ताधिकरणविरोधस्तत्र 'निवीतं मनुष्याणां, प्राचीनावीतं पितॄणा, मुपवीतं देवाना'मिति श्रुतिमाधिकृत्य 'उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात्' [जै० ३।४।१।१०] इति मीमांसायामुपवीतत्वादीनां परस्परभेदस्याऽतिस्फुटत्वादिति वाच्यं शक्तिभेदेनोभयोपपत्तेः। न च'अन्यायश्चाऽनेकार्थत्व'मितिजैमिनीयन्यायविरोधः विनिगमकसत्त्वे तन्न्यायावकाशात् प्रकृते च तदभावात्। प्रत्युत लाघवे सामान्यशक्तिरेवोचिता। तुष्यतु वा विशेषशक्तिमात्राङ्गीकारेण सुजनः। तथाऽपि सामान्यपुरस्कारेण छन्दोगपरिशिष्टीयपरिभाषाबलादसति बाधके सामान्यपरतैवोतपवीतपदस्य स्मार्त्ते कर्मणि प्रयुज्यते। एवं च श्राद्धादिकाले वामस्कन्धे द्वयोर्दक्षिणस्कन्धे च (१)द्वयोः सूत्रसमुदायविशेषयोर्धारणस्वीकरणं मूर्खानां न श्रद्धेयं सर्वदेशीयशिष्टाचारविरोधाच्चेति। कण्टकोद्धारकृतस्तु सदेति प्रक्रम्यमाणकर्मकालपरमेव। अत एव पूर्वोत्तरार्द्धयोर्हेतुसद्भावेनाऽन्वयान्न वाक्यभेदः।

यज्ञोपवीते द्वे धार्ये श्रौते स्मार्त्ते च कर्मणि।

इत्यादिना,

गा(२)यत्र्यां च शिखां बध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः।
जुटिकां च ततो बध्वा ततः कर्म समाचरेत्॥

इति ब्रह्मपुराणवचनेन चाऽङ्गत्वस्थैर्यात्। एतेन सदेत्यादिविधिरिति मूर्खतैव। विशिख इत्यादिनिन्दार्थवादस्थपुरुषार्थविधिशक्तिमेवाऽन्तर्भातीति परा(३)स्तम्। अत एव कर्माऽन्यकाले न धारणावश्यकता। परन्तूपवीतधारणम्—

सकृदुत्तारणात्तस्य प्रायश्चित्तीयते हि सः।

इति वाक्यान्तरबलात्पुरुषार्थमपीति प्राहुः।

अन्ये तु उक्तवचनमालोचयन्तो यज्ञोपवीतधारणस्याऽपि न पुरुषार्थताम्। तथासत्यभ्यङ्गादिकाले यज्ञोपवीतत्यागस्य शिखामोचनस्य च प्रामा(४)णिकैः करणाचारविरोधादिति वदन्तीत्यास्तामात्य(५)वेशः। गोभिलः—'यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वाऽपि वा कुशरज्जुमेव'।

(१) च–इति क० पुस्तके नास्ति।
(२) गायत्र्या—इति ख० पुस्तके पाठः।
(३)परास्तपत्रम्–इति क० पुस्तके पाठः।
(४) च–इति क० पुस्तके नास्ति।
(५) मत्यावेषः इति ख० पुस्तके पाठः।

अत्र सूत्रमिति मुख्यः पक्षः। अरण्यादौ तदलाभे वस्त्रं चौराद्युपहतौ तस्याऽप्यभावे कुशरज्जुमिति उत्तरोत्तरमभावविधिरिति निबन्धारः। निगमपरिशिष्टे-'वाससा यज्ञोपवीतानि कुर्यात्तदभावे त्रिवृता सूत्रेण कुशमुञ्जवालप्रतिसररज्जुभिर्वा'। वालोऽत्र गोवालः।

कार्पासक्षौमगोवालशरवल्कतृणोद्भवम्।
सदा सम्भवतो धार्यमुपवीतं द्विजातिभिः॥

इति देवलसंवादात्। शरगोवालादिषु नवगुणत्रिसरत्वादिनियमो नाऽस्ति सूत्र एव तदुपदेशात्। अवघातादयस्तु व्रीहिधर्मत्वात्तत्कार्यकारिष्वपि क्रियन्ते। गुणादयस्तु यज्ञोपवीतान्तर्गता एव, न तु धर्मा इति टीकाकारः। तदभावे त्रिवृता सूत्रेणेति एकस्याऽभिधानमिति न गोभिलादिविरोध इति बहवः।। कल्पतरुकृतस्तु 'यज्ञोपवीतपदमुत्तरीये गौणं तद्धर्मविन्यासविशेषप्राप्त्यर्थम्' इत्याहुः। (१)इति व्याख्याने त्रिवृत्सूत्रादयोऽप्युत्तरीयप्रतिनिधय एव। तथा च कात्यायनः 'तृतीयमुपवीतं वा योगपट्टं वा (२ कुशरज्जुं वा सूत्रं वा परिधानस्योत्तरार्द्धं चोत्तरीयं कुर्यात्' इति। हारीतः—

ब्रह्मसूत्रोपानहस्त्रं धृतमन्यैर्न धारयेत्।

ब्रह्मसूत्रं यज्ञोपवीतमन्यधृतं सर्वथा न धारयेदुपानद्वये तु तादृशे अप्यापदि कृतनिर्णेजने धार्ये। 'निर्णिक्तं चैव तान्तवम्' इति गौतमवचनादिति कल्पतरुः। स्मृतिः—

पिबतो मेऽस्मश्चाऽन्नं (च)? भुञ्जतोऽनुपवीतिनः।
प्राणायामं त्रिधा षट्कं नक्तत्रययुतं क्रमात्॥

अथ दण्डः-'ब्राह्मणो बैल्वपालाशौ' इत्यादि। पीलुः=गुडफलः। गोभिलः-'पार्णबैल्वा दण्डाः'। पार्णः=पालाशः, पालाशादयः क्रमेण दण्डा ब्राह्मणादीनां प्रशस्ता इत्यर्थः। पारस्करः-'पालाशो ब्रह्मणस्य दण्डो बैल्वो राजन्यस्यौदुम्बरो वैश्यस्य सर्वे वा सर्वेषाम्, एषामलाभे सर्वेषां (३)सर्वे याज्ञियाः'।

धारयेद्बैल्वपालाशौ दण्डौ केशान्तिकौ द्विजः।
यज्ञार्हवृक्षजं वाऽथ सौम्यमव्रण एव च॥

इति वचनात्।

(१) एवं-इति ख० पुस्तके पाठः। (२) वा-इति क० पुस्तके नास्ति।
(३) सर्वे-इति ख० पुस्तके नास्ति।

एतेषामप्यलाभे तु सर्वेषां सर्वयज्ञियाः ।

इति यमवचनाच्च । औदुम्बर इति कुलकल्पभेदेन । केशान्तिक इत्यादि । ललाटोर्ध्वकेशजन्यस्थानस्याऽन्तः केशान्तः । एवं चोर्ध्वस्थितस्य पुरुषस्य भूमितस्तत्पर्यन्तो ब्राह्मणस्य भ्रूमध्यदेशसंमितो राज्ञो नासाग्रसंमितो वैश्यस्य प्रमाणतो दण्ड इत्यर्थः । यत्तु केशान्तिकः कर्णसमीपकेशमूलपर्यन्त इति कस्यचिद्व्याख्यानं तन्न, तथासति ब्राह्मणक्षत्रिययोस्तत्तुल्यप्रमाणत्वे पृथगुपदेशानर्थक्यापत्तेरिति ऋजव इत्यग्रात्रन्येत्र । 'यूपवक्राः' इति गौतमेन नाऽग्रत्वस्य विधानात् । अव्रणाः=अच्छिद्राः, सौम्यदर्शनाः=अतिस्थौल्यादिनिबन्धनभयानकत्वरहिताः, अनुद्वेगकराः=स्वरूपेणाऽभीषणा (१)इति । अत्राऽजिनोपवीतमेखलाधारणमदृष्टार्थं, दण्डधारणन्तु अवलम्बनगोसर्पादिनिवारणादिदृष्टार्थमित्याहुः ॥

(मिता०) दण्डादिधारणमाह—

दण्डेति । तथा स्मृत्यन्तरप्रसिद्धं पालाशादिदण्डं, अजिनं (२)कार्ष्णादि, उपवीतं कार्पासादिनिर्मितं, मेखलां च मुञ्जादिनिर्मितां ब्राह्मणादिर्ब्रह्मचारी धारयेत् ॥

(वी० मि०)

ब्राह्मणेषु चरेद्भैक्षमनिन्द्येष्वात्मवृत्तये ॥ २९ ॥

भिक्षितमन्नादिकं भिक्षा । भिक्षेत भिक्षामित्यादिप्रयोगस्य बहुशो दर्शनात् । तत्समूहो भैक्षम् । 'तस्य समूहः' (पा० सू० ४ । २ । ३७) इत्यनुवृत्तौ 'भिक्षादिभ्योऽण्' (पा० सू० ४ । २ । ३८) इत्यनुशासनात् । (३)एवञ्च भैक्ष्यमिति यकारयुक्तोऽपपाठः, अणधिकारे पुनरण्ग्रहणेन एभ्यो बाधकं बाधित्वाऽण् स्यादित्यभियुक्ताभ्यां व्याख्यानात् । अनिन्द्येष्वनभिशस्तादिषु स्वकर्मनिरतेषु (४)च ।

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचर्या(५)चरेद्भैक्षं गृहेभ्यः प्रय(६)तोऽन्वहम् ॥

---

(१) इति-इति ख० पुस्तकेऽधिकम् । (२) कार्ष्णाजिनादि ख० ।

(३) एवञ्च इत्यारभ्य व्याख्यानात्-इत्यन्तो ग्रन्थः ख० पुस्तके नास्ति ।

(४) च-इति ख० पुस्तके नास्ति ।

(५) ब्रह्मचर्याचरेद्भैक्ष-इति ख० पु० पाठः । (६) मह्वितो-इति क० पु० पाठः ।

इति मनुवचनात् । तेन ब्राह्मणेष्वनिन्द्येषु भिक्षया लब्धमन्नादि ब्रह्मचारी चरेदाहरेदित्यर्थः । आत्मनो वृत्तये प्राणरक्षणाय न तु परार्थम् आचार्यादिव्यतिरेकेण ।

> समाहृत्य तु तद्भैक्षं यावदर्थममायया ।
> निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥

इति मनुनाऽऽचार्याय तन्निवेदनस्याऽभ्यनुज्ञानात् । न चाऽदृष्टार्थं तद्भैक्षं हविषा संस्तुतम् । तत्राऽऽचार्यो देवतार्थे आहवनीयार्थे च भोजयित(१)व्यः । 'यदुच्छिष्टं प्राश्नाति (२)हविरुच्छिष्टमेव तद्भवति' इत्यापस्तम्बात् । 'आचार्यस्तु यदि स्वेच्छया न भुञ्जीत तदपि तदनुज्ञया स्वयं भुञ्जीत' इत्याहुः । ब्राह्मणेष्विति सति सम्भवे नियमः । तदभावे व्यासः—

> ब्राह्मणक्षत्रियाविशश्चरेयुर्भैक्षमन्वहम् ।
> सजातीयगृहेष्वेव सार्ववर्णिकमेव वा ॥

सार्ववर्णिकमित्यापद्विषयं, तेन सति सम्भवे ब्राह्मणेषु तदभावे स्वसमानवर्णेषु तदभावे (३)शूद्रवर्ज्यं सर्वेषु (४)आपदादिषु । सर्वेषु भिक्षेति चत्वारः पक्षाः । तथा च भविष्ये—

> सर्वं वाऽपि चरे(५)द्ग्रामं पूर्वोक्तानामसम्भवे ।
> अन्त्यवर्ज्यं महाबाहो ! इत्याह भगवान्विभुः ॥
>
> वाचं नियम्य प्रयतः आमिषं चाऽपि वर्जयेत् ।
> चातुर्वर्ण्ये चरेद्भैक्षमलाभे कुरुनन्दन ! ॥

शौनकः—

> गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
> अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ॥

एतच्च नित्यभिक्षायाम् । यत्तु—

> मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ।
> भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥

---

(१) भोजयितव्यम्-इति क० पु० पाठः । (२) महि-इति ख० पु० पाठः ।
(३) स्वसमानशूद्रवर्ज्यं-इति ख० पु० पाठः । (४) सर्वेषु आपदादिषु- इति ख० पु० नास्ति ।
(५) भागं-इति ख० पु० पाठः ।

सुवर्णं रजतं रालं सा पात्रेऽस्य विनिक्षिपेत्।

इति मनुवचनं तदुपनयनाङ्गप्राथमिकभिक्षाविषयमित्यविरोधः।

(१)मनुः—

प्रतिगृह्योक्षितं दण्डमुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याऽग्निं चरेद्भैक्षं यथाविधि॥ २९॥

(वी० मि०)

आदिमध्यावसानेषु भवच्छन्दोपलक्षिता॥
ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम्॥ ३०॥

ब्राह्मणादीनां ब्रह्मचारिणां भिक्षावाक्ये यथाक्रममादौ मध्ये अन्ते च स्थितेन भवच्छब्देन सम्बोध्य लिङ्गवता उपलक्षिता भैक्षचर्या कार्येत्यर्थः। तेन 'भवति भवन् वा भिक्षां देहि' इति ब्राह्मणस्य, 'भिक्षां भवति भवन् वा देहि' इति क्षत्रियस्य, 'भिक्षां देहि भवति भवन्वा' इति वैश्यस्य ब्रह्मचारिणो भिक्षावाक्यं सिद्ध्यति। अत एव हारीतः—

सप्ताक्षरां चरेद्भिक्षां क्षां च हिं च न वर्जयेत्।

'क्षां च हिं च' इत्यनेन भिक्षां देहीति पदयोरपि प्रयोगो मत इत्युक्तमिति कल्पतरुः। अतः सप्ताक्षरत्वं स्त्रियामेव सम्बोध्यायामित्यवधेयम्॥ ३०॥

(मिता०) भैक्षचर्याप्रकारः—

ब्राह्मणेष्वित्यादि। पूर्वोक्तदण्डादियुक्तो ब्रह्मचारी ब्राह्मणेष्वनिन्द्येषु अभिशस्तादि(२)व्यतिरिक्तेषु स्वकर्मनिरतेषु भैक्षं चरेत्। आत्मवृत्तये आत्मनो जीवनाय न परार्थं आचार्यतद्भार्यापुत्रव्यतिरेकेण। निवेद्य गुरवे तदनुज्ञातो भुञ्जीत। 'तदभावे तत्पुत्रादौ' इति नियमात्। अत्र च ब्राह्मणग्रहणं सम्भवे स(३)ति नियमार्थम्। यत्तु सार्ववर्णिकं भैक्षचरणमिति तत्त्रैवर्णि(४)कविषयम्। यच्च चातुर्वर्ण्यं चरेद्भैक्षमिति तदापद्विषयम्। कथं भैक्षचर्या, आदिमध्यावसानेषु भवच्छब्दोपलक्षिता 'भवति भिक्षां देहि, भिक्षां भवति देहि, भिक्षां देहि भवति' इत्येवं वर्णक्रमेण भैक्षचर्या कार्या॥ २९॥ ३०॥

---

(१) मनुः-इत्यारभ्य यथाविधि-इत्यन्तं क० पुस्तके नास्ति। (२) दिदोषरहितेषु- ख०।
(३) सति न नियमार्थ० ख०। (४) त्रैवर्णिकाप्राप्त्यर्थम् ० ख०।

(वी० मि०)

कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया ॥
अपोशानक्रियापूर्वं सत्कृत्याऽन्नमकुत्सयन् ॥ ३१ ॥

गुर्वनुज्ञया कृताग्निकार्यो ऽन्नं सत्कृत्याऽकुत्सयन् वाग्यतः, अपोशानक्रियापूर्वं भुञ्जीतेति योजना। तत्र गुर्वनुज्ञया त्वमिदं भुङ्क्ष्वेति विनियुङ्क्ष्वेति वाऽऽचार्यानुमत्येत्यर्थः। कृतमग्निकार्यमग्नौ समिदाधानादिकं येन स तथा। 'अत्र पुनरग्निकार्यग्रहणं प्रातःसन्ध्याकाले कथञ्चिदकृताग्निकार्यस्य कालान्तरविध्यर्थं न पुनस्तृतीयप्राप्त्यर्थम्' इति मिताक्षरायाम्। अन्ये तु भैक्ष्यतदेकदेशहोमोऽत्राऽग्निकार्यशब्देनाऽभिप्रेत इति वदन्तस्तत्र हविषो हुत्वा सन्तर्प्याऽग्निं समिधं दत्त्वा 'यदत्र यदन्नमसी'त्युक्त्वाऽनुमन्त्रयेत्। 'त्रिः स्विष्टकृतमग्निकार्यं कृत्वाऽनुज्ञातो भुञ्जीत वाग्यतः' इति पैठीनसिवचनं, 'प्रोक्षिताद्भैक्षादग्नौ हुत्वा भुञ्जीत' इत्यापस्तम्बवचनं च प्रमाणयन्ति। सत्कृत्य=पूजयित्वा, भूतानामुत्पत्तिस्थितिहेतुतया ध्यात्वा। अकुत्सयन्=अनिन्दन्, वाग्यतो=मौनी, अपोशानक्रिया 'ऽमृतोपस्तरणमसी'त्यनेन जलगण्डूषपानं तत्पूर्वकं यथा स्यात्। तदुक्तं ब्राह्मे—

आपोशानं च गृह्णीयात्सर्वतीर्थमयं च तत्।
अमृ(१)तोपस्तरणमसीति, विष्णोरन्नमयस्य च ॥

अथ भोजनविधिः। स च 'आचारादर्शछन्दोगाह्निकाऽऽचारचिन्तामण्या'द्यनुसारेणाऽत्रैव लिखनीयः। संवर्तः—

अष्टौ ग्रासा मुनेर्भैक्षं षोडशाऽरण्यवासिनः।
द्वात्रिंशतं गृहस्थस्य अमितं ब्रह्मचारिणः ॥ ३१ ॥

(मिता०) भोजनप्रकारः—

कृताग्नीति। पूर्वोक्तेन विधिना भिक्षामाहृत्य गुरवे निवेद्य तदनुज्ञया कृताग्निकार्यो वाग्यतो मौनी अन्नं सत्कृत्य सम्पूज्य अकुत्सयन्ननिन्दन् अपोशानक्रियां अमृतोपस्तरणमसीत्यादिकां पूर्वं कृत्वा भुञ्जीत। अत्र पुनरग्निकार्यग्रहणं सन्ध्याकाले कथञ्चिदकृताग्निकार्यस्य काला(२)न्तरविध्यर्थं न पुनस्तृतीयप्राप्त्यर्थम् ॥ ३१ ॥

---

(१) अमृतोपस्तरमसी विष्णोरन्नमयस्य च—इति क० पुस्तके पाठः।

(२) कालान्तरं मध्याह्नादि०।

(वी० मि०)

ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ॥

ब्रह्मचर्ये स्थित आश्रितब्रह्मचर्यो ब्रह्मचारीति यावत् । एकमेक-स्वामिकमन्नं अनापदि अन्नान्तरलाभसम्भवे नाऽद्यात् । एकस्मिन् दिने यदीयमन्नं भुक्तं तदव्यवहितदिने तदीयमन्नं नाऽश्नीयादित्यर्थः । (वी० मि०) एतदपवदति ।

ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ॥ ३२ ॥

ब्राह्मणग्रहणं राज्ञश्चेद्ब्रह्मचारी तदा श्राद्धे आमन्त्रितोऽभ्यर्थितः काममेकान्नमप्यश्नीयात् मधुमांसादिवर्जनेन व्रतं ब्रह्मचारिनियमम-पीडयन् । ब्राह्मणग्रहणं राजन्यवैश्ययोः(१) श्राद्धे भोजनव्यावृत्त्य-र्थम् । तदाह श्राद्धभोजनमुपक्रम्य मनुः—

राजन्यवैश्ययोश्चैव नैतत्कर्म प्रशस्यते ।

इति । काममित्यनेनाऽकामानुमतिर्विवक्षिता, तेनाऽभ्यर्थितस्य स्वेच्छया श्राद्धेऽप्येकान्नभोजनं व्यवच्छिन्नं तत्पर एव (२)च स्मृत्य-न्तरे ब्रह्मचारिणः श्राद्धभोजननिषेध इति स्मर्तव्यम् ॥ ३२ ॥

(मिता०) ब्रह्मचर्य इति । ब्रह्मचर्ये स्थित (३)एकान्नं नाद्यादनापदि व्याध्याद्यभावे । ब्राह्मणः पुनः श्राद्धेऽभ्यर्थितः सन् (४)काममश्नी-यात् । व्रतमपीडयन् मधुमांसपरिहारेण । अत्र ब्राह्मणग्रहणं क्षत्रियादेः श्राद्धभोजनव्युदासार्थम् । 'राजन्यवैश्ययोश्चैव नैतत्कर्म प्रचक्षते' इति मनुस्मरणात् ॥ ३२ ॥

(वी० मि०) ब्रह्मचारिणो नियमानाह--

मधुमांसाऽञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम् ॥

भास्करालोकनाश्लीलपरिवादांश्च (५)वर्जयेत् ॥ ३३ ॥

मधु=मद्यं क्षौद्रं च, मांसं = सर्वमेव, अञ्जनं=घृतादिना गात्रस्य, कज्जलेन वाऽक्ष्णोः, उच्छिष्टं=भुक्तशेषं, स्वस्य=गुरुव्यतिरिक्तस्य पर-स्याऽपि, 'उच्छिष्टमगुरोर्भोज्यम्' इति वसिष्ठवचनात् । शुक्तं=परुषं वचः, स्वभावमधुरं कालवशादम्लतां गतं दध्यादिव्यतिरिक्तं च, प्राणि-

(१) शूद्रयोः–इति ख० पुस्तके पाठः ।
(२) च-इति ख० पुस्तके नास्ति ।
(३) एकान्नमेकस्वामिकम्० ।
(४) कामं यथेष्टम्० ।
(५) परिवादादि -इति मुद्रितपुस्तके पाठः ।

पदं हिंसासामान्यलाभार्थं, भास्करस्य उद्यतोऽस्तं गच्छतश्चाऽऽलोकनं, अश्लीलं=ग्राम्यं, परिवादः=परनिन्दा। अत्र मध्वादेर्भक्ष्यतया प्रसक्तस्याऽभक्षणात्। स्त्रियाश्चाऽष्टविधमैथुननिवृत्तेरश्लीलस्याऽनभिधानादञ्जनादीनां च क्रियाणामकरणाद्वर्जनं द्रव्यं गुर्वनुज्ञयेत्युक्तम् ॥ ३३ ॥

(मिता०) मधुमांसादिवर्ज्यान्याह—

मधुमांसेत्यादि। मधु क्षौद्रं न मद्यम्। तस्य 'नित्यं मद्यं ब्राह्मणो वर्जयेत्' इति निषेधात्। मांसं छागादेरपि। अञ्जनं घृतादिना गात्रस्य, कज्जलादिना चाक्ष्णोः। उच्छिष्टमगुरोः। शुक्तं निष्ठुरवाक्यं (१)नान्नरसः, तस्याऽभक्ष्यप्रकरणे निषेधात्। स्त्रियमुपभोगे। प्राणिहिंसनं जीववधः। (२)भास्करस्योदयास्तमयावलोकनम्* । अश्लीलमस(३)त्यभाषणम्। परिवादः सदसद्रूपस्य परदोषस्य ख्यापनम्। आदिशब्दात्स्मृत्यन्तरोक्तं गन्धमाल्यादि गृह्यते। एतानि ब्रह्मचारी वर्जयेत् ॥ ३३ ॥

(वी० मि०) तत्र को गुरुरित्यपेक्षायां गुरुं निरूपयन्नेव प्रसङ्गादाचार्यादीनामपि निरूपयति—

स गुरुर्यः क्रियां (४)कृत्वा वेदमस्मै प्रयच्छति ॥
उपनीय दद्द्वेदमाचार्यः स उदाहृतः ॥ ३४ ॥
एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते ॥

क्रियां निषेकाद्यां संस्कारहेतुभूतामुपनयनान्तां तदव्यवधानेनैव वेदाध्यापनस्य 'उपनीय वेदमध्यापयेत्' इत्यादौ विधानात्। कृत्वेत्यर्थाद्ब्रह्मचारित्वाभिमतस्यैव। वेदं सम्पूर्णैकशाखं साङ्गं सार्थं च अस्मै ब्रह्मचारिणे प्रयच्छत्युपदिशति यः स तस्य गुरुरित्यर्थः। एतच्च ब्राह्मणपरम्, इतरस्याऽध्यापनाऽनधिकारात्। तथा च वक्ष्यति। एवं च निषेकादिकामुक्तां क्रियां यथाधिकारमशेषां यो यस्य करोति स तस्य गुरुरिति साधारणमेकयोक्त्या गुरुलक्षणम्। अत एव—

---

(१) न रसादि क० । (२) भास्करस्य चालोकनं क० ।
(*)भास्करालोकनमुदितास्तमितादावादित्यस्यावलोकनम्-इति गुरुसम्प्रदायागतः पाठ-संशो०।
(३) गुरुभाषणं ख० । (४) क्रियाः-इति मुद्रितपुस्तके पाठः ।

निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चाऽन्नेन स विप्रो गुरुरुच्यते ॥

इति मनौ यथाविधीति विप्र इति चोक्ताऽभिप्रायकतयैव नेयम् । अ-(१)न्यथा क्षत्रियादीनां स्वपुत्रं प्रति गुरुत्वाभावप्रसङ्गादिति बहवः । वस्तुतस्तु मान्यमाननरूपब्रह्मचारिधर्मान् वक्तुं गुर्वादिमान्यस्वरूपं तत्प्रसङ्गाद् गृहस्थमान्यर्त्विक्स्वरूपं चोक्तम् । गुर्वनुज्ञयेत्यादौ च गुरुत्वमुपनेतृत्वमेवाऽऽचार्यसाधारणं प्रमीतपितृकसाधारण्येनैव विधानात् । गुरुशब्दशक्तिस्तु जनकत्वोपाधिना मातापित्रोरेव तयोरे(२)व भूयसो लोकशास्त्रयोर्गुरुशब्दप्रयोगदर्शनात् ।

आचार्य्याः पितरो ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥
वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवो मताः ।
माता मातामही गुर्वी मातुलानी च सोदरा ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियः ।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विधा ॥

इत्यादावाचर्यादावपि गुरुशब्दप्रयोगस्तद्धर्ममाननीयत्वप्राप्त्यर्थको गौणः ।

जनकश्चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥

इत्यादौ जनकभिन्ने पितृशब्दप्रयोगवत् । भयदेवहरिनाथादिसंमतोऽप्ययमेवाऽर्थ इति तत्त्वम् । ददिति अध्यापयतीत्यर्थः । य इति शेषः । तथा च मनुः—

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ॥

कल्पशब्देन व्याकरणादीनि षडङ्गान्युपलक्ष्यन्ते । वेदं सम्पूर्णम् । एकदेशं वैक(३)देशम् । यदाह मनुः—

एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥

---

(१) अन्यथा—इत्यारभ्य गुर्वादि-इत्यन्तं ख० पुस्तके नास्ति ।
(२) तयोरेव—इति ख० पुस्तके नास्ति ।
(३) वैकदेशम्—इति ख० पुस्तके नास्ति ।

यज्ञकृत्=वृतः सन् पाकयज्ञादिकर्ता । यदाह मनुः—

अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान् ।
यः करोति वृतो यस्य तस्य ऋत्विगिहोच्यते ॥

(वी० मि०)

एते मान्या यथापूर्वमेभ्यो माता गरीयसी ॥ ३५ ॥

एते गुर्वादयश्चत्वारः समवाये सति पूर्वपूर्वाऽनतिक्रमेणोत्तरोत्तरेऽभिवादनादिना माननीयाः । जननी तु सर्वेभ्य एव मान्यतमा । तदाह मनुरपि—

उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता ।
सहस्रेण पितुर्माता गौरवेणाऽतिरिच्यते ॥

गौतमस्तु मातुराचार्यस्य च गौरवे विकल्पं मन्यते । यदाह—'आचार्यः श्रेष्ठो गुरूणाम्' । यत्तु स्मृत्यन्तरे क्वचित्पितुर्गुरुतरत्वाभिधानं तद्विक्रयादिपरमिति द्रष्टव्यम् ॥ ३४–३५ ॥

[मिता०] गुर्वाचार्यादिलक्षणमाह—

स इति । योऽसौ गर्भाधानाद्या उपनयनपर्यन्ताः क्रिया यथाविधि कृत्वा वेदमस्मै ब्रह्मचारिणे प्रयच्छति स गुरुः । यः पुनरुपनयनमात्रं कृत्वा वेदं [१]प्रयच्छति स आचार्यः ॥ ३४ ॥

[मिता०] उपाध्यायर्त्विग्लक्षणम्—

एकदेशमिति । वेदस्यैकदेशं मन्त्रब्राह्मणयोरेकं अङ्गानि वा योऽध्यापयति स उपाध्यायः । यः पुनः पाकयज्ञादिकं वृतः करोति स ऋत्विक् । एते च गुर्वाचार्योपाध्यायर्त्विजो यथापूर्वं यथाक्रमेण मान्याः पूज्याः । एभ्यः सर्वेभ्यो माता गरीयसी पूज्यतमा ॥ ३५ ॥

[वी० मि०] ब्रह्मचर्यकालनियममाह—

प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा ॥
ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे ॥ ३६ ॥

प्रतिशाखं स्वगृह्योक्तब्रह्मचारिव्रतं द्वादश पञ्च वा वर्षाणि का-

---

(१) ददाति ख० ।

र्थम्। प्रतिवेदमित्यभिधानान्नानावेदाध्ययनमायाति। तदाह मनुः—

वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्॥

अत्र वर्षवेदयोर्विकल्पः। शक्त्यपेक्षया फलभूमा कल्पनीय इति तु केचिद्ग्रहणान्तिकमिति। यावता कालेन शाखानां शाखयोः शाखाया वा अध्ययनं सम्पद्यते तावत्कालमित्यर्थः। पुरुषबुद्धितारतम्यापेक्षयोक्तकालादधिको न्यूनो वाऽध्ययनसमाप्तिकालो व्रतावधिरित्येके-इत्यस्यार्थः।

केशान्तो गोदानाख्यः संस्कारविशेषः। गर्भकालावधिकषोडशवर्षे कार्यः। 'गर्भादिसङ्ख्या वर्षाणा'मिति बौधायनात्। केचित्तु-जन्मावधिकमेवाऽत्र षोडशत्वं 'गर्भाष्टमे' इत्यादाविव विशेषमनभिधाय 'अष्टमे वाऽब्दे' इत्यादाविव षोडशे इति निर्विशेषितविधिना तथा स्थैर्यादित्याहुः। एतद्ब्राह्मणमात्रपरम्। तथा च मनुः—

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य ह्यधिके ततः॥ ३६॥

(मिता०) वेदग्रहणार्थं ब्रह्मचर्यावधिमाह—

प्रतिवेदमिति। यदा विवाहासम्भवे वेदानधीत्य वेदौ वा वेदं वेति प्रवर्तते तदा प्रतिवेदं वेदं वेदं प्रति ब्रह्मचर्यं पूर्वोक्तं द्वादशवर्षाणि कार्यम्। अशक्तौ पञ्च। ग्रहणान्तिकमित्येके वर्णयन्ति। केशान्तः पुनर्गो(१)दानाख्यं कर्म गर्भादारभ्य षोडशे वर्षे ब्राह्मणस्य कार्यम्। एतच्च द्वादशवार्षिके वेदव्रते बोद्धव्यम्। इतरस्मिन् पक्षे यथासम्भवं द्रष्टव्यम्। राजन्यवैश्ययोस्तूपनयनकालवद्द्वाविंशे चतुर्विंशे वा (२)द्रष्टव्यम्॥ ३६॥

(वी० मि०) अथोक्तकालेषूपनयनासम्भवे गौणं कालमाह—

आषोडशाच्च(३)द्वाविंशाच्चतुर्विंशाच्च वत्सरात्॥
ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥ ३७॥

---

(१) गावः केशा दीयन्ते खण्ड्यन्ते यस्मिन्। (२) वा यथासम्भवं ख०।
(३) आषोडशाद्द्वाविंशाच्चतु०- इति मुद्रितपुस्तके पाठः।

अभिविध्यावाङ् प्रत्येकं च सम्बध्यते, 'छन्दांसि परेऽपि' 'व्यवहिताश्च'[१।४।८१,८२]इत्यनुशासनात्। तेन षोडश ब्राह्मणस्य, द्वाविंशं क्षत्रियस्य, चतुर्विंशं च वैश्यस्य वर्षमभिव्याप्योपनयनस्य परो मुख्यादन्यः कालः इत्यर्थः । चकारो मिथः समुच्चये । यत्तु 'द्वादश षोडश विंशतिश्चेत्यतीता विरुद्धकाला भवन्ती'ति पैठीनसिवचनं, तत्तु द्वादशवर्षाद्यतिक्रमे स्वल्पपापप्रतिपादनपरमित्यविरोधः ।

(वी० मि०) नाऽतः परं व्रात्यस्तोमं विना गौणोऽप्युपनयनकालोऽस्तीत्याह—

अत ऊर्ध्वं पतन्त्येते सर्व(१)धर्मबहिष्कृताः ॥
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥ ३८ ॥

अत इति (२)बहुवचनान्तात्तसिल् । तेनोक्तकालेभ्य ऊर्ध्वमेते ब्राह्मणादयः सावित्रीतः पतिताः भ्रष्टाः सावित्र्युपदेशाऽयोग्या भवन्तीति यावत्, अतश्च पतन्ति उपपातकिनो भवन्ति, 'व्रात्यता बान्धवत्याग' इति मनावुपपातकगणनात् । अत एव च (३)द्विजातिधर्माऽनधिकारिणो भवन्ति । यद्यप्युपपातकस्याऽभ्यस्तस्यैव निबन्धृभिः कर्माऽनाधिकारप्रयोजकत्वं लिखितं, तथाऽपि प्रकृते वचनबलादनभ्यस्तस्याऽपि कर्मानधिकारप्रयोजकत्वं द्रष्टव्यम् । अत एव (४)च शास्त्रे तत्र तत्र व्रात्यपदवाच्याः । अत्र प्रतिप्रसवः । व्रात्यस्तोमादृते क्रतोरिति । व्रात्यस्तोमः क्रतुः व्रात्यानां प्रायश्चित्तक्रतुः तं विना । तेनोक्तकालेभ्य ऊर्ध्वमपि कृतव्रात्यस्तोमा उपनेया (५)एव भवन्ति, न तु व्रात्यस्तोममात्रेणोपनयनं विनाऽप्याधिकारिणो भवन्तीति ॥ ३८ ॥

(मिता०) उपनयनकालस्य परमावधिमाह—

आषोडशादिति, अत ऊर्ध्वमिति च । आषोडशाद्वर्षात् षोडशवर्षं यावत् । आद्वाविंशादाचतुर्विंशाद्वर्षाद्ब्र(६)ह्मक्षत्रविशां औपनायनिकः उपनयनसम्बन्धी परः कालः । नाऽतःपरमुपनयनकालोऽस्ति । किन्तु अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः सर्वधर्मेष्वनधिका-

---

(१) यथाकालमसंस्कृताः इति अपरः पाठः । (२) एव- इति ख० पुस्तके पाठः ।
(३) च- इति क० पुस्तके नास्ति । (४) च-इति ख० पुस्तके नास्ति ।
(५) एव-इति ख० पुस्तके नास्ति । (६) ब्राह्मणक्षत्रियविशां ख० ।

रिणो भवन्ति । सावित्रीपतिताः पतितसावित्रीका भवन्ति सावित्रीदानयोग्या न भवन्ति । व्रात्याः संस्कारहीनाश्च (१)व्रात्यस्तोमात् क्रतोर्विना । कृते तु तस्मिन्नुपनयनाधिकारिणो भवन्ति ॥३७-३८॥

(वी० मि०) अत्राऽऽद्यास्त्रयो द्विजा इति प्रागभिधानाद् व्रात्यस्याऽपि सति द्विजत्वे कथं द्विजातिधर्मोऽनधिकार इत्यपेक्षायां न केवलं ब्राह्मण्यादिजातियोगमात्रेण द्विजत्वं, किन्तु सविधिमौञ्जीबन्धनादित्याह—

मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ॥
ब्राह्मणक्षत्रियविशस्तस्मा[illegible] [illegible]स्मृताः ॥ ३९ ॥

द्वितीयमिति क्रियाविशेषणम् । यस्माद्ब्राह्मणादयो मातृतः प्रथमं जायन्ते द्वितीयं मौञ्जिबन्धनात्तस्मादेते द्विजाः । व्रात्यानां च मौञ्जीबन्धनाऽभावान्न द्विजत्वमिति भावः । मौञ्जीति ह्रस्वत्वमार्षमित्याहुः । अत्र मौञ्जीबन्धनजनितसंस्कारे जनिरौपचारिकः ॥ ३९ ॥

(मिता०) आद्यास्त्रयो द्विजा इत्युक्तं तत्र हेतुमाह—

मातुरिति । मातुः सकाशात्प्रथमं जायन्ते, मौञ्जिबन्धनाच्च द्वितीयं जन्म यस्मात्तस्मादेते ब्राह्मणक्षत्रियवैश्या द्विजा उच्यन्ते ॥३९॥

(वी० मि०) 'आहूतश्चाऽप्यधीयीते'ति प्रागुक्तस्याऽध्ययनस्य फलमाह—

यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् ॥
वेद एव द्विजातीनां निःश्रेयसकरः (२)परः ॥ ४० ॥

यज्ञानां पाकयज्ञज्योतिष्टोमादीनां तपसां कायसन्तापनरूपाणां चान्द्रायणादीनां अन्येषाम[३]पि शुभफलानां दानाऽध्ययनादीनां कर्मणां मध्ये वेदाध्ययनमेव सर्वोत्कृष्टमभ्युदयसाधनं वैदिकसकलवृत्तिनिदानभूतवाक्यार्थबोधादिजनकत्वादित्यर्थः । अत्र स्मृत्याद्यध्य[४]यनस्य तथात्वेऽपि वेदाध्ययनमूलकत्वेन तस्मादपकर्षः ।

---

(१) व्रात्यस्तोमो नाम व्रात्यानां प्रायश्चित्तक्रतुः । तेन चोद्दालकव्रतादिप्रायश्चित्तान्तरमप्युपलक्ष्यते. अपरार्कः ।

(२) स्मृतः—इति ख० पुस्तके पाठः । (३) अपि—इति ख० पुस्तके नास्ति ।

(४) 'यनस्य तथात्वेऽपि वेदाध्य०'—एतावानंशः ख० पुस्तके नास्ति ।

विशेष-सूचना ।

हमारे यहां हर तरह की संस्कृत पुस्तकें भाषा टीका के हरवक्त तैय्यार रहती हैं इसके अलावे हर तरह की छपाई तथा जिल्द के बंधाई का कार्य भी होता है ।

संस्कृत तथा भाषा भाष्य पुस्तकों का बड़ा सू[illegible] मुफ्त मंगाकर देखिये ।

नीचे लिखे पते पर पत्र व्यवहार क[illegible]